अनुकूलव्यापारत्वमाख्यातशक्यतावच्छेदकम् । अनुकूलत्वस्य संसर्गत्वात् व्यापारत्वमात्रं तथेत्येके । अनुकूलत्वमात्रं तथेत्यन्ये । धातोरर्थः फलम् अनुकूलत्वव्यापारादिकमाख्यातस्येति मण्डनः । तत्तत्फलावच्छिन्नव्यापारविशेषः तद्धात्वर्थः सङ्ख्यावर्तमानत्वादिकं क्वचिदाश्रयत्वादिकमाख्यातार्थ इति गुरवः । तत्सर्वं निराचिकीर्षुः प्रतिजानीते ।

॥ आख्यातस्येति ॥

End:

कृञः कृतिशक्तौ कृतोऽपि कर्तृत्वशक्त्या कर्तृपदात् कृतिकर्त्रेति बोधः स्यादिति शङ्कां दृष्टान्तेन निरस्यन् विशेषदर्शनप्रयुक्तव्यवहारस्याप्रामाणिकत्वात् कर्तृरूपव्यवस्थयेति तदप्रमाणयति ज्ञातेति । स विषयधातुरकर्तृस्थ ताश्रये.... ।

Subject: Ākhyātavādavyākhyā.

Remarks: —The Ms. is in a fairly good condition.

This work is a commentary on the portion of Raghunātha's Dīdhiti, dealing with verbs.

॥ आख्यातवादटिप्पणम् ॥

6593. ĀKHYĀTAVĀDAṬIPPAṆAM.

S. K. Collection No. 18.

Substance—Paper. Size—10 × 3½ inches. Sheets—44. Lines—9-12 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Raghudeva. Complete. Not printed.

Beginning:

प्रणम्य नीरदश्याममुद्दामगुणमन्दिरम् ।
आख्यातवादसद्व्याख्या रघुदेवेन तन्यते ॥

नैयायिकः परमतं निराकर्तुं प्रथमतः स्वमतं निरूपयति । आख्यातस्येति । यत्नोऽत्राच्यः । यत्नत्वविशिष्टो वाच्यः । यत्नत्वं शक्यतावच्छेदकमिति यावत् । यथाश्रुते यत्नस्य व्यापारान्तर्गतत्वेन व्यापारशक्तिवादिमतव्यवच्छेदाप्रतीतेः ।

End:

क्वचिदाश्रयकत्वादिकमपीति भावाख्यातस्थले आश्रयत्वादेरभावात् । क्वचिदिति । प्रसङ्गादिति । लक्षणादिना तादृशानुभवोपपादने तु लाघवतर्कस्यैव शरणीकरणीयत्वादिति भाव इति दिक् ॥

Colophon:

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिताख्यातवादटिप्पणं समाप्तिमगमत् ।

शेषभट्टसुधीपुत्रबालंभट्टेन धीमता ।

द्रव्यैः संपादितमिदं जगन्नाथात्तु पुस्तकम् ॥

Subject: Ākhyātavādaṭippaṇa.

Remarks :—The Ms. is in a fairly good condition. On the title page is given;—

'शेषभट्टात्मज बालाख्यस्य'

The author of this Vāda is identical with the commentator of Dīdhiti. This tract represents only a commentary on the portion of the Dīdhiti, dealing with verbs.

॥ ज्ञानलक्षणाविचारः ॥

6594. JÑĀNALAKṢAṆĀVICĀRAḤ.

Burnell's Catalogue No. 10860. Page 121. Left column. Substance—Palm leaf. Size—$16\frac{3}{4} \times 1\frac{1}{2}$ inches. Leaves—10 (66-75). Lines—18 to a Page. Script—Grantha. No. of Granthas—520. Author—Raghudevabhaṭṭācārya. Complete. Not printed.

Beginning:

(परामर्श) विनानुमितेरनुदयात् अनुमिति.... र्श- हेतुरिति सिद्धान्तः। तत्र धूमपरामर्शसत्त्वे घटानुमित्यनुद- यात् पर्वताद्युद्देश्यकवन्ह्यादिविधेयकानुमितिं प्रति पर्वतादि- विशेष्यकवन्ह्यादिव्याप्य...रकनिश्चयो हेतुरिति विशिष्य- कार्यकारणभावः कल्पनीयः।

End:

...आवश्यकन्त्व । गुणमानसजनकतावच्छेदकतया

तादृशजातिकल्पनम् । अन्यथा संस्कारादीनां मानसापत्तिरित्यलं सताग्रहणेतिदिक् ।

Colophon:

इति रघुदेवभट्टाचार्यविरचितज्ञानलक्षणाविचारः ।

विलूनशिष्टानि वृषध्वजेन
विहाय धातुर्वदनानि वाणी ।
निःशङ्कमास्ते वदने यदीये
वन्दे गुरूंस्तान् मम रामनाथान् ॥

सोमास्कन्दं परानन्दं कर्पूरधवलं शिवम् ।
रत्नसिंहासनासीनं त्यागराजमहं भजे ॥

Subject: Jñānalakṣaṇāvicāra.

Remarks:—The Ms. is in a fairly good condition. There are three leaves at the end containning a letter to Muttuveṅkayya a descendent of Veṅkaṭādri by Rāmanāthamakhin. The Makhin bemoans the pitiable state of the Brāhmaṇa class and in high flown language praises Muttuveṅkayya. There is a mention of one Raṅgayya at the end and then, another letter follows by the same Makhin. It is to one of his friends, Appāśāstrin, who seems to have been a favourite of king Sherfoji. Rāmanātha has sent to him a friend of his, Paraśurāmaśāstrin, by name. That gentleman seems to be suffering from pecuniary difficulties and Rāmanātha has written this letter recommending Paraśurāmaśāstrin to the king's favourite. Paraśurāmaśāstrin has a big family and for his sake Rāmanātha asks Appāśāstrin to do the needful. The letter closes with an elegy on the pitiable state of the Brahmaṇa

pandits and an eulogy on the first mentioned, Muttuvenkayya.

The letters are as follows:—

(1) 'श्रीमत्प्रशस्तगुणरत्नगणाकरेषु
गांभीर्यसारतुलिताब्धिषु धैर्यलक्ष्म्या ।
मन्थानमेरुतुहिनाचलसन्निभेषु
दीनावलीहरिणनव्यपयोधरेषु ॥
आचारनिर्जितवसिष्ठपराशरेषु
दूरावधूतरविनन्दनविक्रमेषु ।
गद्यानवद्यरसपद्यगुरूपमेषु
श्रीवेङ्कटाद्रिकुलवारिधिकौस्तुभेषु ॥
आशाविजृम्भितयशश्चयकौमुदीषु
दैन्यान्धकारपरिमोषणपण्डितेषु ।
प्रत्यर्थिपङ्कजनिमीलनदाक्षिणेषु
श्रीमुद्दुवंशघनवेन्दुषु सम्प्रतीयम् ॥
विज्ञप्तिराशीर्लसिताधिकानि
श्रेयांसि भूयांसि भवेयुरस्मै ।
इत्याशिषो विदधता समुदा सहस्रं
श्रीरामनाथमखिना क्रियते त्रिसन्ध्यम् ॥

मार्गशीर्षशुक्लसप्तम्यां सुखेन स्थीयेत । स्वामिनां सौन्दर्यसौलभ्य-सौशील्याद्यनन्तकल्याणगुणगणाकर्णनसन्तोषतुन्दिलनिजान्तःकर-णाः सर्वेऽप्यत्रत्याः विद्वद्गणैः सह "गुणात्मके वस्तुनि मौनता चेत् वागजन्मवैफल्यमसह्यशल्यकम्" इति न्यायेन किंचिदुच्यते । भवतां गुणगणगणनायां तद्वर्णनायां च सहस्रफणामणिरेव समर्थः । एतावन्तमनेहसं ब्राह्मणानां न क्वापि सौख्यमस्ति । तस्मादध्यय-

नाध्यापनादिकं विरलं जातं स्थितं । इदानीं तु भवद्भिः स्वर्णान्न-
वसनादिवृष्टिः क्रियत इति कृत्वा वेदशास्त्रादीनामभिवृद्धिर्जायते ।
पूर्वं रंगयकास्वस्त्यस्तु । १'

(2) 'स्वस्ति श्रीमत्प्रशस्तकल्याणगुणरत्नरत्नाकरायमाणेषु निखिलविद्या-
निषद्यायमाणेषु अव्याजपरोपकारनिरतेषु अण्णाशास्त्रिषु गा-
ढालिंगनपूर्विका इयं विज्ञप्तिः । सप्तश्रीपर्यन्तं सुखेनैव स्थीयते ।
श्रीमतामपि योगक्षेमयोः लिखित्वा प्रेषणीयम् । श्रीमन्तो राजवल्ल-
भास्सन्तः बहूनां विदुषां बहूनां च उपक्रियां कृत्वा स्थीयत इति
वारंवारं श्रावंश्रावं सन्तुष्यामि । विवेकिनां विदुषां भवादृशां
विशिष्य मया किं वक्तव्यमास्ते । समयोचितमनुष्ठेयम् । अस्मदीय
परशुरामशास्त्रिणो भवतां निकटे प्रेषिताः । तेषामिदानी-
मनुपपत्तिर्भूयसी क्षेत्रस्वाम्यादि सर्वं गतम् । पुत्राः द्वित्राः पुत्र्यश्च
इदानीं क्लेशमनुभवन्तीति भवन्निकटं प्रेषिताः । श्रीमद्भिर्यथाविधेयं
यथावदस्मिन् समये एषा अनुपपत्तिः शान्ता भविष्यति तथा एते
दयनीयाः । समयोऽयं । किमधिका विज्ञप्तिर्विज्ञेषु । यथा रोचेत
तथा विधेयम् । एवं विज्ञप्तिः । वेदशास्त्रादीनामङ्कुरोत्पत्तिमात्रं
जातम् । इदानीं तु भवद्दयया शाखोपशाखया अभिवृद्धिर्जायते ।
भवद्भिर्दीयमानं सात्विकम् पूर्वेषां राजसादिसंकलितं दानम् ।
तस्माद्ब्राह्मणानामाशिषा ब्राह्ममायुषां शतं प्राप्नुहि । विशिष्य
प्राप्तकामानां भवतां वयं किमाशास्महे । सहस्रमाशिषः ।

लोकाभिरामगुण लोचननन्दनीय
श्रीकामसुन्दरतनो श्रितपारिजात ।

राकानिशाकरसमानन राजमान्य
श्रीमुद्दवेंगयमणे विजयस्व भूयः ॥,
श्रीरस्तु ॥

॥ निरुक्तिप्रकाशः ॥

6595. NIRUKTIPRAKĀŚAḤ.

Not noticed by Burnell No. 15559.

Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—24 (24-47). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—875. Author—Raghudevabhaṭṭācārya. Incomplete. Not printed.

Beginning:

...यज्ञानद्वयरूपकारणसत्वादिति वाच्यम् । तथाविध-ज्ञानद्वयकाले तथाविधभेदज्ञानासम्भवेनोक्तानुपपत्तेरनव-काशात् ॥

End:

एवञ्च विलक्षणप्रमितिजनकव्यतिरेकव्याप्तिज्ञानवि-शेष्यत्वमेव केवलव्यतिरेकिहेतुत्वमित्याहुः ।

Colophon: (Sheet No. 38)

इति श्रीमन्न्यायालङ्काररघुदेवभट्टाचार्यविरचिते निरुक्तिप्रकाशे अनु-मानखण्डे परामर्शग्रन्थः ।

Subject: Niruktiprakāśa—Anumānakhaṇḍa—Parāmarśa.

Remarks:—The Ms. is in a fairly good condition. This work seems to be an independent and complete manual rather than a tract.

॥ विशिष्टवैशिष्ट्यवादः ॥

6596. VIŚIṢṬAVAIŚIṢṬYAVĀDAḤ.

Burnell's Catalogue No. 2329. Page 121. Left column. Substance—Paper. Size—$12\frac{1}{4} \times 6\frac{1}{2}$ inches. Sheets—5. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—144. Author—Ācāryaraghudeva. Complete. Not printed.

Beginning:

विशेषणतावच्छेदकप्रकारकनिर्णयशून्यकाले विशिष्टस्य वैशिष्ट्यमिति रीत्या बोधापत्तिवारणाय विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिर्णयत्वे मद्धेतुता? कल्पते ।

End:

तत्र नियमित्वानिवेशे गला(?)निवेशेन लाघवसंभवात् । संशयस्य विरोधित्वाभ्युपगमेनैवानुपपत्ति गन्धमिति संक्षे...... ।

Colophon:

इति श्रीमदाचार्यरघुदेवविरचिते विशिष्टवैशिष्ट्यबोधः समाप्तः

Subject: Viśiṣṭavaiśiṣṭyavāda.

Remarks.—The Ms. is in a fairly good condition.

॥ विशिष्टवैशिष्ट्यवादः ॥

6597. VIŚIṢṬAVAIŚIṢṬYAVĀDAḤ.

Burnell's Catalogue No. 12337. Page 110. Right column Substance—Paper. Size—$12 \times 5\frac{1}{8}$ inches. Sheets—6.

Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—330. Author—Ācāryaraghudeva. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 6596.

Remarks:—The Ms. is in a fairly good condition and is full of scriptorial blunders.

Dr. Burnell labels this Ms. as 'A metaphysical fragment' and assigns its place at the end of the Mādhva sections.

॥ विशिष्टवैशिष्ट्यबोधवादः ॥

6598. VIŚIṢṬAVAIŚIṢṬYABODHAVĀDAḤ.

J. L. Collection No. 920.

Substance—Paper. Size—11 × 4 inches. Sheets—16. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—420. Author—Raghudeva. Complete. Not printed.

Beginning:

विशिष्टवैशिष्ट्यबुद्धिश्चतुर्विधा । विशेष्ये विशेषणम् तत्रापि च विशेषणान्तरमिति न्यायेन, एकत्र द्वयमिति न्यायेन, विशिष्टे वैशिष्ट्यमितिन्यायेन, विशिष्टस्य वैशिष्ट्यमितिन्यायेन च इति भेदात् । न च विशिष्टे वैशिष्ट्यमितिन्यायेन विषयितायां मानाभावः ।

End:

कारणमात्रविभागजविभागस्य नैयायिकैरनभ्युपगमेऽपि वैशेषिकैरभ्युपगमात् । न च द्रव्यारम्भकसंयोगविरोधि...कार्यकारणभावः । कर्मजविभागे कारणकारणवि-

भागजकार्याकार्यविभागे च..., ।

Subject: Viśiṣṭavaiśiṣṭyabodhavāda.

Remarks:—The Ms. is in a faitly good condition. On the title page is given

सिद्धान्तरहस्यस्थावादा: । इदं पुस्तकं रङ्गभट्टभट्टगोस्वामिनाम् ।

॥ आख्यातादिवादटीका ॥

6599. ĀKHYĀTĀDIVĀDAṬĪKĀ.

J. L. Collection No. 921.

Substance—Paper. Size—10½ × 4½ inches. Sheets—17. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Rāmakriṣṇa. Incomplete. Not printed.

Beginning:

मुकुन्दचरणद्वन्द्वमादाय हृदयांबुजे ।
आख्यातवादसद्व्याख्या रामकृष्णेन तन्यते ॥

आख्यातस्येति । यत्नत्वमाख्यातवाच्यतावच्छेदकमित्यर्थः तेन व्यापारशक्तिवादिनो यत्ने सामान्यतः शक्तिस्वीकारेऽपि न सिद्धसाधनम् । एवं च यत्नत्वमाख्यातशक्यतावच्छेदकं तत्त्वबोधकविवरणत्वादिति भावः ।

End:

नियमः धात्वर्थाभावे विभक्त्यर्थत्वानियमः ननु षोडशिग्रहणस्य इष्टसाधनत्वं कथं तस्याङ्गत्वादित्यत आह मुख्येति । ननु ग्रहणाभावोऽपि चेदिष्टः कथं तर्हि ग्रहणे

प्रवृत्तिरित्यत आह ग्रहणविधिरिति अत एवेति अव्यय-
मात्रस्यैव... ।

Colophon: Nil.

Subject: (1) Ākhyātavādaṭīkā Sheets 1-14
(2) Nañśiromaṇiṭīkā Do. 14-17.

Remarks:—The Ms. is in a fairly good condition.

Perhaps, the author of these 2 tracts—Rāmakṛṣṇa may be identified with the author of Līlāvatī—a commentary on Śiromaṇi. If so, he is the son of Raghunātha and belonged to the 16th century A. D. These 2 halfs are bits of that big commentary on the Dīdhiti.

॥ उपाधिन्यायवार्तिकटीका ॥

6600. UPĀDHINYĀYAVĀRTIKAṬĪKĀ.

Burnell's Catalogue No. 10960. Page 121. Right column.

Substance—Palm leaf. Size—16 × 1 inches. Leaves—110 (3-112). Lines—7 to a Page. Script—Grantha. No. of Granthas—2900. Author—Lakṣmaṇasūri. Incomplete. Not printed.

Beginning:

उपाधेर्दूषणत्वस्याद्याप्यसिद्धेः । इत्थमेवायमपि दूषण-
मस्तु । शरीराजन्यत्वात्यन्ताभाववद्व्यक्तित्वरहितत्वा-
कर्तृकत्वसाधकत्वसाधकं न भवति । अजन्यमात्रवृत्तित्वर-
हितवृत्तित्वान्मेयत्ववदिति ॥

End:

तत्र वक्तव्यं । प्रयोजनवत्कर्तृमत्त्वमात्रं विवक्षितं स्व-

प्रयोजनवत्कर्तृमत्त्वं वेति विकल्प्याद्ये दूषणमाह ॥ सं-
स्कारिगतेति ॥

Colophon: (Leaf No. 102.)

इति श्रीमद्रघुकुलतिलकचरणकमलोपजीविनिखिलविद्वज्जनमनोहरश्री-
मल्लक्ष्मणसूरिविरचितायां उपाधिवार्तिकटीकायां तृतीयः परि-
च्छेदः

Subject: Nyāyavārtikaṭīkā Upādhi 1-4 Paricchedas.

Remarks:—The Ms. is in a fairly good condition.

Lakṣmaṇasūri is the auther of this work Upādhinyāyavārtikaṭīkā. This is a ṭīkā on the portion of Udyotakāra's Vārtika, dealing with Upādhi.

॥ गुणधर्माः ॥

6601. GUṆADHARMĀḤ.

Burnell's Catalogue No. 10913b, Page 118, Right column. Substance—Palm leaf. Size—14 × 1½ inches. Leaves—4. Lines—6 to a Page. Script—Telugu. No. of Granthas—48. Author—Nandīśa.? Incomplete. Not printed.

Beginning:

गुणधर्माः प्रकाश्यन्ते नन्दीशरचिताः स्फुटम् ।
रूपरसस्पर्शगन्धाः संख्यादिपरिमाणकम् ॥

पृथक्त्वमपि संयोगो विभागः परता तथा ।
अपरत्वं गुरुत्वञ्च द्रवत्वमपि संस्कृतिः ॥

चतुर्दशगुणा भूत्वा रूपं शुक्लादिषड्विधम् ।

रसोऽपि षड्विधो गन्धोऽसुरभिः सुरभिस्तथा ॥

End:

वायोर्नवैकादश तेजसो गुणाः

जलक्षितिप्राणभृतां चतुर्दश ।

दिक्कालयोः पञ्चगुणाः षडम्बरे

..........मनसस्तथैव च ॥

Subject:

Remarks:—The Ms. is in fairly good condition. The other work contained herein is Niruktivṛtti.

We can make out that this Ms. represents a work of one Nandīśa, dealing with qualities and the dravya, number of qualities possessed by each.

॥ ज्ञानकारणतावादः ॥

6602. JÑĀNAKĀRAṆATĀVĀDAḤ.

Burnell's Catalogue No. 2828. Page 121. Left column. Substance—Paper. Size—12½ × 6¼ inches. Sheets—6. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Nārāyaṇasārvabhaumabhaṭṭācārya. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

घटत्वप्रकारकज्ञानशून्यकाले घटो नास्तीत्याकारका-

भावलौकिकप्रत्यक्षस्य(नु)दयादभावलौकिकप्रत्यक्षं प्रति

प्रतियोगितावच्छेदकप्रकारकं ज्ञानस्याहेतुतेति मिश्रप्रभृ-

तयः । अत एव प्रतियोग्यविषयकनेत्याकारकाभावप्रत्य-
क्षस्यापत्तिरप्यपास्ता ॥ न चैतादृशप्रत्यक्षस्यासिद्धैव....
नापत्तिरिति वाच्यम् ।

End:

न च तथापि सङ्घर्षस्य विषयनिष्ठतयैव हेतुत्वेन पुरु
षान्तरोपसम्बन्धविशेषणतासहकृतघटत्वप्रकारकज्ञानादपि
फलोत्पत्त्यापत्तिरिति वाच्यम् । घटत्वप्रकारकज्ञानव-
त्पुरुषेन्द्रियसंबन्धविशेषणतायाः फलोत्पादनियमाङ्गीकारे-
णादोषादिति दिक् ।

Colophon:

इति श्रीनारायणसार्वभौमीयः प्रतियोगिज्ञानकारणताविचारः ।

श्रीरामार्पणमस्तु ।

Subject: Pratiyogijñānakāraṇatāvicāra.

Remarks;—The Ms. is in a fairly good condition.

This Ms. is full of scriptorial blunders.

Nārāyaṇasārvabhaumabhaṭṭācārya is the author of this pamphlet, entitled Jñānakāraṇatāvāda. The author seems to have, flourished about the middle of the 18th century A. D.

॥ तर्कटिप्पणी ॥

6603, TARKAṬIPPAṆĪ.

Burnell's Catalogue No. 2325. Page 118. Right column. Substance—Paper. Size—13×6 inches. Sheets—41. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1280. Author—Gadādhara. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

तर्काद्यत्वानुमित्यौपयिकव्याप्तिनिश्चयविरोधिशङ्कानिवृ-
त्तिरूपेयते तत्र तर्ककारणीभूतस्यापादकनिष्ठापाद्यव्या-
प्त्यापाद्यविरहपक्षतावच्छेदकादीनां निश्चयस्य विरोधिनी
या शङ्का तन्निराकृत्यर्थमपि तर्कात्पूर्वं तर्कान्तरमुपेयम् ॥
तत्पूर्वमपि च तज्जनकनिश्चयविरोधिशङ्कान्तरनिवृत्त्यर्थं त-
र्कान्तरमित्यनवस्था तर्काधारास्वीकारप्रसङ्ग इत्याशङ्कते ।
मूले तर्कस्येति ॥

End:

परमतेनेति । नैयायिकनये शक्तेरप्रसिद्ध्या तदतिरि-
क्तत्वघटितसाध्या प्रसिद्धेरिति भावः । तदप्रयोजकत्वम् ॥

Colophon:

तर्कटिप्पणी समाप्ता ॥

Subject; Gadādharīya Tarkaṭippaṇī.

This is perhaps the portion of Gadādhara's commentary on the Dīdhiti, dealing with the topic—Tarka.—(i.e) reductio ad absurdum.

The complete text of Gadādhara's commentary on the Dīdhiti has been edited by V.P. Dvivedin in the Chowkhamba Sanskrit Series.

॥ भूयोदर्शनवादे सहचारवादः ॥

6604. BHŪYODARŚANAVĀDE SAHACĀRAVĀDAḤ.

Burnell's Catalogue No. 2324. Page 116. Left column.

Substance—Paper. Size—13×6¼ inches. Sheets—7-23 (17). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—690. Author—Gadādhara. Incomplete. Wants beginning. Not printed.

Beginning:

...न पक्षधर्मादौ व्याप्तिज्ञानसंभव इति ज्ञानद्वयस्यानुमितिहेतुता तादृशस्य च नियमस्यान्यथाख्यातिवादिनां मते संभवदुक्तिकतेत्यन्यथाख्यात्यनभ्युपगमस्य प्रकटीकरणम् ।

End:

प्रतियोगिग्राहकातिरिक्तविशेषणतावच्छिन्नत्वस्यापादकाविशेषणतया आवश्यकत्वाद्देशान्तरावृत्तित्वस्य च प्रतियोग्यग्राहकत्वेन तदवच्छिन्नापादकतापत्तेर्न योग्यानुपलम्भानिर्वाहकतेत्यादिरस्वरसो वदंतीत्यनेन सूचितः

Colophon:

इति गदाधर्यां सहचारग्रन्थः समाप्तः ॥

Subject: Gadādharī—Bhūyodarśanavāda, Sahacāravāda.

Remarks:—The Ms. is in good condition.

This and the following 4 Mss. represent probably portions of Gadādhara's commentary on Dīdhiti; vide remarks under No. 6603.

॥ भूयोदर्शनवादः ॥

6605. BHŪYODARŚANAVĀDAḤ.

Burnell's Catalogue No. 10954b. Page 121. Right column.

Substance—Palm leaf. Size —15¾ × 1¼ inches. Leaves—6 (4-9). Lines—8 to a Page. Script—Telugu. No. of Granthas—144. Author—Gadādhara. Complete. Printed.

Beginning:

सेयं व्याप्तिर्न भूयोदर्शनपदस्य दर्शनानां न प्रत्येकहे- तुत्वादाशुतरविनाशिना... ।

End:

अतो घटत्वादिसकलविशेषज्ञाने...न घटो...न वेति संशयः

Colophon:

भूयोदर्शनवादः समाप्तः

Subject: Gadādharī Bhūyodarśanavāda; same work as 6603.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 6671.

Dr. Burnell calles this as Vyāptivāda and notices it as an unidentified fragment.

॥ लिङ्गकरणतावादः ॥

6606. LIṄGAKARAṆATĀVĀDAḤ.

Burnell's Catalogue No. 2282. Page 116. Right column. Substance—Paper. Size—11¼ × 6 inches. Sheets—27. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Gadādhara. Complete. Printed.

Beginning:

उपलक्षणस्यैव परिचायकत्वेन प्रसिद्धतया परिचायक- त्वाप्रतिक्षेपेण लिङ्गमेव विशेषणमिति विशेषणत्वोपगमो

मूलेऽसङ्गतः । न च परिचायकत्वप्रतिक्षेप एवायं ग्रन्थः ।

End:

तत एवानुमितेः सकरणत्वं निर्वह्निगानुमितित्वाव-
च्छिन्नं प्रतिदिनत्वादिना हेतुहेतुत्वमपि निर्युक्तिकमित्या-
द्यस्वरसबीजमत्र बोध्यमिति ।

Colophon: Nil.

Subject: Lingakaraṇatāvāda.

Remarks:—The Ms. is in a fairly good condition.

If this is only a portion of Gadādhara's commentary on the Dīdhiti, it has been printed; vide remarks under No. 6603. As a separate tract, it has not yet appeared in print.

॥ लिङ्गकरणतावादः ॥

6607. LIṄGAKARAṆATĀVĀDAḤ.

Burnell's Catalogue No. 2335. Page 121. Left column. Substance—Paper. Size—$13\frac{1}{4} \times 6\frac{1}{2}$ inches. Sheets—28. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—760. Author—Gadādhara. Complete. Printed.

Beginning, end and subject—Same as No. 6606.

Colophon:

इति लिङ्गकरणतावादः समाप्तिमगच्छत् ।

....

Remarks:—The Ms. is in a fairly good condition.

॥ व्युत्पत्तिवादः ॥

6608. VYUTPATTIVĀDAḤ.

Burnell's Catalogue No. 2197. Page 116. Left column.
Substance—Paper. Size—12½×6 inches. Sheets—178.
Lines—9 or 10 to a Page. Script—Devanāgarī. No. of
Granthas—5000. Gadādhara. Complete. Printed.

Beginning:

शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते । स च क्वचिदभेदः । क्वचिच्च तदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः ॥

End:

न च तात्पर्याभावात् सुखाद्यसाधनत्वाबोधोपपत्तौ विध्यर्थत्वेऽपि क्षतिविरह इतिवाच्यम् । तस्य विध्यर्थत्वे तत्तात्पर्येणाधुनिकानां न भुञ्जीतेत्यादिप्रयोगोपपत्तेः ।

Colophon:

इति व्युत्पत्तिवादार्थः समाप्तः । ग्रन्थसंख्या पुस्तकं ५०००

श्रीवेङ्कटेशार्पणमस्तु

Subject: Gadādharīya Vyāptivāda.

Remarks:—The Ms. is in good condition. On the title page is given हे पुस्तक+अस्से

This work has been published from Bombay (1911) by Hari Raja, Harināthā and Ramāpatimiśra, with the commentary Gūḍhārthatattvāloka,.

6 Mss. of this work are described below in a table.

VYUTPATTIVĀDA.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6609	B. L. 2198	Paper.	$12\frac{1}{2} \times 6$	173	10	Devanāgarī.	Complete.
6610	N. S. 29	,,	$10 \times 4\frac{1}{2}$	188	10	,,	Incomplete: wants end.
6611	B. L. 2257	,,	10×4	15	8 or 9	,,	,, ,,
6612	S. K. 26	,,	$8 \times 4\frac{1}{4}$	14	9-11	,,	,, ,,
6613	S. S. 65a	Palm leaf.		26 (19-44)	5-9	Telugu.	I Khaṇḍa only.
6614	B. L. 2253	Paper.	$10 \times 8\frac{3}{4}$	167 (16-182)	8	Devanāgarī.	Incomplete; wants beginning.

DETAILED REMARKS
on the
VYUTPATTIVĀDA MSS. NOTICED IN THE ABOVE TABLE.

6613 After the colophon is gives—

शर्वर्यां श्रावणे मासे शुक्लपक्षे भृगोर्दिने ।

द्वादश्यां लिखितो वादो व्युत्पत्त्याख्यो मया मुदा ॥

इदं पुस्तकं वरलक्ष्मीव्रतदिनमंदु व्राशिनानु । स्वहस्तलिखितं ।

The Ms. evidently belongs originally to the Telugu districts.

At the beginning there is one broken leaf dealing with Vedānta. After the colophon are given 5 verses praising the worship of Brahmins.

The works contained herein are—

1 Vyutpattivāda.
2 Gadādhara's Dīdhitivyākhyā—Caturdaśalakṣaṇī and
3 Sūktimuktāvalī.

6614 After the colophon is given—

परिधाविनामसंवत्सरे हेमन्ततौ मार्गशीर्षमासे शुक्लपक्षे एकादश्यां शुभतिथौ आरणीग्रामे व्युत्पत्तिवादस्समाप्तः ।

॥ शक्तिवादः ॥

6615. ŚAKTIVĀDAH.

Burnell's Catalogue No. 2278. Page 117. Left column. Substance—Paper. Size—$12\frac{1}{4} \times 6$ inches. Sheets—47. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of

Granthas—1100. Author—Gadādharabhaṭṭācārya.
Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

सङ्केतो लक्षणा चार्थे पदवृत्तिः । वृत्त्या पदप्रतिपाद्य एवार्थ इत्यभिधीयते । इदं पदमिममर्थं बोधयत्विति अस्माच्छब्दादयमर्थो बोद्धव्य इति चेच्छासङ्केतरूपा वृत्तिः । आधुनिकसङ्केतः परिभाषा ।

End:

तथा च गवादिपदस्य समवायेन कथीः ? तत्संबन्धेन तत्प्रकारकज्ञाने शक्तिग्रहस्यैव तादृशबोधहेतुत्वमिति वाच्याञ्चवीतेन ?

Colophon:

इति श्रीगदाधरभट्टाचार्यविरचितः शक्तिविचारः समाप्तः स्वस्ति श्रीनृपशालिवाहनशके १७२६ रक्ताक्षिनामसंवत्सरे दक्षिणायने वर्षर्तौ श्रावणमासे शुक्लपक्षे षष्ठ्यां स्थिरवासरे इदं पुस्तकं संपूर्णम् ॥

Subject: Śaktivāda.

Remarks:—The Ms. is in a fairly good condition.

Dr. Burnell notices this tract under 'Āloka and its commentaries'. The date of the Ms. is Śaka 1726 (i.e.) A. D. 1804.

If this tract is only a portion of Gadādhara's commentary on the Dīdhiti, it has been printed; vide notes under No. 6608. As a separate tract, however, it has not been published.

॥ शक्तिवादः ॥

6616. ŚAKTIVĀDAḤ.

Burnell's Catalogue No. 2249. Page 116. Right column. Substance—Paper. Size—$9\frac{3}{4}\times4\frac{1}{2}$ inches. Sheets—38. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—Gadādharabhaṭṭācārya. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6615.

Remarks:—The Ms. is in a fairly good condition.

॥ शक्तिवादः ॥

6617. ŚAKTIVĀDAḤ.

N. S. Collection No. 38. Substance—Paper. Size—$12\frac{1}{2}\times3\frac{3}{4}$ inches. Sheets—3. Lines—12 to a Page. Script—Grantha. No. of Granthas—100. Author—Gadādharabhaṭṭācārya. Incomplete. Wants end. Printed.

Beginning, and subject—Same as No. 6615.

End:

विशेषतः पदान्तरघटितस्य ... ॥

Remarks:—The Ms. is in a fairly good condition.

॥ शक्तिवादः ॥

6618. ŚAKTIVĀDAḤ.

Burnell's Catalogue No. 9115. Page Left column. Substance—Paper. Size—$17\times1\frac{1}{4}$ inches. Leaves—4, 5 & 6. Lines—8 or 9 to a Page. Script—Grantha.

No. of Granthas—100. Author—Gadādhara. Incomplete. Printed.

Beginning;

....च स्वाभावात्मकघटविरहरूपत्वात् अन्योन्याभावस्य प्रतियोगितावच्छेदकधर्मरूपत्वा ननु घटान्योन्यभावो न घटात्यन्ताभाव इति स्वभावसंसर्गाभावस्त्वमर्थो वाच्यः ।

End:

कार्यवैजात्यं विना सहकारिवैजात्याभाव इति दिक् ।
मुरारिमिश्रास्तु ।

Subject: Śaktivāda.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 501.

॥ धर्मितावच्छेदकविचारः ॥

6619. DHARMITĀVACCHEDAKAVICĀRAḤ.

Burnell's Catalogue No 2304. Page 121. Left column. Substance—Paper. Size—14×6 inches. Sheets—27. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Harirāmabhaṭṭācārya. Complete. Not printed.

Beginning:

श्रीवेदव्यासाय नमः । अविघ्नमस्तु ।

अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः सामानाधिकरण्यम् । तेनैकपुरुषस्य परामर्शदशायां तच्छू-न्यपुरुषान्तरस्य नानुमितिः । तस्य समवायरूपकारणता-घटकसंबन्धेन परामर्शानधिकरणत्वात् । नवीनास्तु समा-

नधार्मितावच्छेदकत्वमनुमितिपरामर्शयोः कार्यकारणभा-
वघटकप्रत्यासत्तिः ।

End:

समवायप्रत्यासत्तिकल्पे विषयभेदेन लिङ्गादिभेदेन च भिन्नैव परामर्शहेतुताऽस्तु । पूर्वोपदर्शितविनिगमनाविरहेणानन्तकारणताधिक्यात् तदपेक्षयात्मव्यक्तिभेदेन उपदर्शितकारणताकल्पनस्यैव उचितत्वादित्याहुः ।

Colophon:

इति श्रीहरिरामविरचितधर्मितावच्छेदकप्रत्यासत्तिविचारः समाप्तः ।

Subject: Dharmitāvacchedakavicāra.

Remarks:—The Ms. is in a very good condition. The Ms. is full of scriptorial blunders.

Harirāmabhaṭṭācārya, the author of many tracts, besides a ṭīkā on the Maṇi, is the teacher of Raghudeva and Gadādhara. His date, therefore must be about the end of the 16th and in the beginning of the 17th century A. D.

॥ धर्मितावच्छेदकविचारः ॥

6620. DHARMITĀVACCHEDAKAVICĀRAḤ.

Burnell's Catalogue No. 2305. Page 121. Left column. **Substance**—Paper. Size—14×6 inches. **Sheets**—18. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Harirāmabhaṭṭācārya. Complete. Not printed.

Beginning, end, colophon, and subject—Same as No. 6619.

Remarks:—The Ms. is in a fairly good condition.

॥ धर्मितावच्छेदकतावादः ॥

6621. DHARMITĀVACCHEDAKATĀVĀDAḤ.

J. L. Collection No. 922. Substance—Paper. Size—11 × 8¾ inches. Sheets—16. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—575. Author—Hariramathattacarya Not printed.

Beginning, end colophon and subject—Same as No. 6619.

Remarks:—The Ms. is in a fairly good condition.

॥ नव्यमतम्—परामर्शः ॥

6622. NAVYAMATAM—PARĀMARŚAḤ.

Burnell's Catalogue No. 2327. Page 121. Left column. Substance—Paper. Size—11¾ × 4½ inches. Sheets—30. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—810. Author—Harirāmatarkālaṅkāra. Complete. Not printed.

Beginning:

अनुमितिं प्रति पर्वतीयधूमव्यापको वन्हिरित्याकारक-
परामर्श एव हेतुः। न तु वह्निव्याप्यधूमवान् पर्वत इत्या-
कारकः

End:

तदानीमनुमित्यनुत्पादानिर्वाहेण अनुमितौ तादृशसा-
मग्र्याः प्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवमपि अनुमित्या-
दिकं प्रत्यर्थापत्त्यादिसामग्र्याः प्रतिबन्धकत्वकल्पनवादि
मते अनुण्णमेवेत्याहुः ॥

Colophon:

इति श्रीभट्टाचार्यहरिरामतर्कालङ्कारवागीशकृतौ नवीनमतविचारः समाप्तिं बभाण । श्रीसाम्बसदाशिवार्पणमस्तु

Subject: Navyamata establishing that Parāmarśa is the Hetu in Anumiti.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रामाण्यवादः ॥

6623. PRĀMĀṆYAVĀDAḤ.

Burnell's Catalogue No. 2241. Page 120. Left column. Substance—Paper. Size—11 × 5⅝ inches. Sheets—17. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—625. Author—Harirāmatarkavāgīśabhaṭṭācārya. Complete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ।

प्रामाण्यं स्वत एव गृह्यत इति मीमांसकाः । तत्र गुरुमते प्रामाण्यग्रहप्रतिबन्धकालीनयावत्स्वाश्रयीभूतज्ञानग्राह्यत्वमेव स्वतस्त्वम् । एवञ्च प्रामाण्यं स्वविषयप्रतिबन्धकाभावकालीनस्वाश्रयज्ञानत्वव्यापकविषयताप्रतियोगि न वेति विप्रतिपत्तिः ।

End:

वस्तुतो ज्ञानतादिकमन्ततो घटादिज्ञानस्य घटमहं जानामीत्याकारकस्यानुभवसिद्धतया तादृशज्ञानस्य च लिंगत्वासंभवेन प्रत्यक्षरूपतानिष्प्रत्यूहैवोपदिशति । युक्तितश्चज्ञानमतीन्द्रियमेव परन्तु शब्दगन्धादिवत्तद्वृति प्रामा-

ण्यमेव योग्यमिति प्राचीनगुरुमतमपि निरसनीयमिति संक्षेपः ।

Colophon:

इति हरिरामतर्कवागीशभट्टाचार्यविरचितप्रामाण्यवादः समाप्तः ॥

Subject: Prāmāṇyavāda.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रामाण्यवादः ॥

6624. PRĀMĀṆYAVĀDAḤ.

Burnell's Catalogue No. 2245. Page 120. Left column.
Substance—Paper. Size—8 × 3 inches. Sheets—26.
Lines—8 to a Page. Script—Devanāgarī. No. of
Granthas—630. Author—Harirāmatarkavāgīśabhaṭṭā-
cārya. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 6623.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given

इदं पुस्तकं डाङ्कपाति नारायणेन लिखितम् ।

॥ प्रामाण्यवादः ॥

6625. PRĀMĀṆYAVĀDAḤ.

S. S. Collection No. 26.

Substance—Palm leaf. Size—18½ × 1½ inches. Leaves—
34 (11-44). Lines—8-11 to a page. Script—Grantha.

No. of Granthas—1750. Author—Harirāma. Incomplete. Not printed.

Beginning:

....श्चावश्यकत्वात् अविरोधिज्ञानत्वादयश्च प्रमायामारोपासम्भवात् प्रमात्वाभावावच्छेदकगृहीतशङ्कत्वादिग्रहदशायां श्वैत्यादिलौकिकग्रहवत्सम्भवात् ।

End:

अनेनापि विशेषणेन विश्वविषयकस्य योगिज्ञानस्यैव भगवज्ज्ञानस्यैव वारणात् तत्र सामानाधिकरण्यान्तविशेषणमेतत्कल्पेऽनुपादेयम् । एवञ्च प्रकारतापर्यन्तस्य ग्राह्य ...... ।

Subject: Prāmāṇyavāda.

Remarks:—The Ms. is in a fairly good condition.

॥ मङ्गलवादः ॥

6626. MAṄGALAVĀDAḤ.

Burnell's Catalogue No. 2330. Page 120. Right column. Substance—Paper. Size—12 × 6¼ inches. Sheets—5. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—182. Author—Harirāmatarkavāgīśa. Complete. Not printed.

Beginning:

ननु मङ्गलं समाप्तिसाधनम् । मङ्गले सत्यपि कादम्बर्यादिग्रन्थासमाप्तेः । मङ्गलं विनापि प्र(स)मनुष्ठितसमाप्तेरन्वयतो व्यतिरेकतश्चाप्यभिचारात् । नापि विघ्नध्वंसं मङ्गलं विनापि तस्य विनायकस्तवपाठादिना जातत्वेन

व्यभिचारात् । तस्मान्मङ्गलं निष्फलमेवेति चेत् । अत्रा-
हुः । मङ्गलं सफलम् । अविगीतशिष्टाचारविषयत्वादित्य-
नुमानेन मङ्गलस्य सफलत्वसिद्धिः

End:

तदर्थं मङ्गलं प्रधानम् । एवं द्विप्रवानविघ्रज्ञानवान्
वात्राधिकापीत्तु(?)संशयोद्भवेपि वा तदाचरणात् । यत्तु
आकारे नैमित्तिकादिकमस्य विचारितं तत्वनुपयुक्तत्वादु-
पेक्षितमस्माभिः ।

Colophon:

इति श्रीहरिरामतर्कवागीशरचितो मङ्गलवादः समाप्तः ॥

Subject: Maṅgalavāda.

Remarks:—The Ms. is in a fairly good condition. This Ms. is full of blunders.

॥ लिङ्गोपहितलैङ्गिकभानविचारः ॥

6627. LIṄGOPAHITALAIṄGIKABHĀNA-VICĀRAḤ.

Burnell's Catalogue No. 2268. Page 120. Right column. Substance—Paper. Size—$12\frac{1}{2} \times 6$ inches. Sheets—84. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—825. Author—Harirāmatarkavāgīśa. Complete. Not printed.

Beginning:

श्रीविनायकाय नमः ॥

वन्हिव्याप्यधूमवान्पर्वत इत्यादिपरामर्शात् वन्हिव्या-

ध्यधूमवान्पर्वतो वन्हिमानित्यनुमितिमामनन्त्याचार्याः । तेषामयमाशयः । तथाविधपरामर्शात् तादृशानुमित्यनङ्गीकारे वन्हिव्याप्यालोकवान् पर्वत इत्यादिपरामर्शादपि * * धूमपरामर्शवत्वानिवेशनमावश्यकं चिन्तामणिकारमते ।

End:

घटपदादिप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबन्धकत्वाकल्पने लाघवसंभवादित्यलमतिशयविस्तरेणेति

Colophon:

इति लिङ्गोपहितलैङ्गिकभानविचारः समाप्तः ॥

स्वस्ति श्रीनृपशालिवाहनशके १७२५ रक्ताक्षिनामसंवत्सरे दक्षिणायने वर्षर्तौ श्रावणमासे शुक्लपक्षे चतुर्दश्यामिन्दुवासरे श्रवणनक्षत्रे शोभननामयोगे वणिक्करणे दिवा तृतीयघटिकासमये तदा सिंहलग्ने इदं पुस्तकं संपूर्णम्

Subject: Liṅgopahitalaiṅgikabhānavicāra.

Remarks:—The Ms. is in a fairly good condition. On the title page is given:—

हे पुस्तक + लिहिलें अस्सें

The date of this Ms. is Śaka 1725 or A. D. 1803.

॥ लिङ्गोपाहितलैङ्गिकभानाविचारः ॥

6628. LIṄGOPAHITALAIṄGIKABHĀNA-VICĀRAḤ.

Burnell's Catalogue No. 2269. Page 120. Right column.

Substance—Paper. Size—11 × 5½ inches. Sheets—24 Lines—14-16 to a Page. Script—Devanāgarī. No. of Granthas—825. Author—Harirāmatarkavāgīśa. Complete. Not printed.

Beginning, end and subject—Same as No. 6627.

Colophon:

इति श्रीहरिरामतर्कवागीशकृतलिङ्गोपहितलैङ्गिकभानविचारः समाप्तः । इम्बलरामेण लिखितोऽयं ग्रन्थः चित्रभानुसंवत्सरभाद्रपदकृष्णपक्षचतुर्दशी भानुवारे समाप्तिमगमत् ।

Remarks:—The Ms. is in a fairly good condition.

॥ विषयतावादः ॥

6629. VIṢAYATĀVĀDAḤ.

N. S. Collection No. 40.

Substance—Paper. Size—12 × 4 inches. Sheets—12 (4-15). Lines—7 to a page. Script—Devanāgarī. No. of Granthas—210. Author—Harirāmabhaṭṭācārya. Incomplete. Not printed.

Beginning:

...स्य भूतलत्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेन... तन्निरूप्यत्वं । किन्तु भूतलत्वावच्छिन्नविशेष्यतात्वेन भूतलं भूतलमित्यादौ च भूतलत्वावच्छिन्नत्वाविशिष्टविशेष्यतात्वेनैव भूतलत्वप्रकारतानिरूपितत्वमित्यभ्युपगमेन तद्वैलक्षण्योपपत्तेः । अवच्छेदकत्वमपि द्विविधम् । अवच्छिन्नं निरवच्छिन्नम् ॥

End:

एतनानुमित्यादिसाधारणविलक्षणविषयतायाः अप-
त्यादिसाधारण्येन तत्स्थलीयप्रतिबन्धकतायां प्रतिबध्य-
तावच्छेदककोटौ प्रत्यक्षान्यत्वमपत्यन्यत्वमपि(?)न्निवेश-
नीयमिति गौरवमित्यपि परास्तम् । इति कृतं पल्लवितेन ॥

Colophon:

इति श्रीतर्कालङ्कार हरिरामभट्टाचार्यविरचितोऽयं विषयता-
वादार्थः समाप्तिमगमत् ॥

Subject: Viṣayatāvāda.

Remarks:—The Ms. is in a fairly good condition.

॥ विषयतावादः ॥

6630. VIṢAYATĀVĀDAḤ.

Burnell's Catalogue No. 2331. Page 121. Left column.

Substance—Paper. Size—$12\frac{1}{4} \times 6\frac{1}{4}$ inches. Sheets—10, Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—260. Author—Harirāmanyāyālaṅkāratarkavāgīśa. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

विषयता च स्वरूपसम्बन्धविशेषो ज्ञानादीनां विषये
न त्वतिरिक्तभावादिति प्राञ्चः । तदसत् । तथाहि विष-
यताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादि ज्ञाननिरूपि-
तानां घटभूतलादिवृत्तिविषयतानामभेदापत्त्या तादृशज्ञा-
नानन्तरं घटप्रकारकज्ञानवानहमित्यादिप्रतीतिवद्भूतलप्र-
कारकज्ञानवानहमित्यादिप्रत्ययप्रसङ्गः

End:

एतेनानुमित्यादि साधारणविलक्षणविषयतायाः प्रत्य-
क्षादिसाधारण्येन स्थलीयप्रतिबन्धकतायां प्रतिबध्यता-
वच्छेदककोटौ प्रत्यक्षान्यत्वं आपच्यन्यत्वं वा निवेश्यमिति
गौरवमित्यपि परास्तमिति कृतं पल्लवितेन

Colophon:

इति न्यायालङ्कारतर्कवागीशविरचितो विषयताविवेकः समाप्तिम-
गमत् ।

Subject: Viṣayatāvāda.

Remarks:—The Ms. is in a fairly good condition.

॥ पक्षतावादः ॥

6631. PAKṢATĀVĀDAḤ.

Burnell's Catalogue No. 2247. Page 120. Left column Substance—Paper. Size—$8\frac{1}{4} \times 2\frac{3}{4}$ inches. Sheets—48. Lines—6 to a page. Script—Devanāgarī. No. of Granthas—680. Author—Rudrabhaṭṭa. Incomplete. Not printed.

Beginning:

श्रीमहेशाचार्यगुरुचरणेभ्यो नमः ।

सत्यपि परामर्शादौ पक्षे साध्यनिर्णयदशायां विनानु-
मित्यानुमितेरनुदयात् अनुमितिं प्रति पक्षताया हेतुत्वं
कल्प्यते । पक्षता च सिसाधयिषाविरहविशिष्टसिद्ध्य-
भावः ।

End:

प्रत्यक्षात्मसिद्ध्यनन्तरं अनुमितिवारणाय साध्य-वत्तानिर्णयत्वेन सिद्धेः प्रतिबन्धकत्वकल्पनञ्च लाघवात्। एवं सामग्रीप्रतिबन्धकत्वे यत्र भाविवह्निमत्ताज्ञानमयमे-त्वम्......................

Subject: Pakṣatāvāda.

Remarks:—The Ms. is in a fairly good condition.

॥ आत्मनेपदशक्तिविचारः ॥

6632. ĀTMANEPADAŚAKTIVICĀRAḤ.

Burnell's Catalogue No. 3250. Page 120. Right column. Substance—Paper. Size—9¼ × 4 inches. Sheets—14. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas— Author—Rudrabhaṭṭa. Incomplete. Not printed.

Beginning:

आख्यातसामान्यस्य कर्तृत्व इव तद्विशेषस्यात्मने-पदस्य कर्मत्वे शक्तिः न तु यथाश्रुतग्राहि वैयाकरणमत इव कर्मरूपधर्मवाचकत्वगौरवात्। प्रथमान्तपदार्थे कर्त्र-त्वान्वयबलादेव कर्मताविशिष्टधर्मलाभसंभवात् न चात्मने-पदस्य शानच्प्रत्ययस्य धर्मिणि शक्ते पच्यमानमानये-त्यादौ पच्यमानादिष्वानयनकर्मत्वान्वययोग्यताद्यनुरो-धेनावश्यकत्वात्।

End:

अभावान्वयश्चात्मनि कालानवच्छिन्नाश्रयतासम्बन्धेन

गम्यतामिति चेन्न तदुत्तरकाले चैत्रीयो वान्नपाकादिकम-प्रसिद्धम् ।

Subject: Ātmanepadaśaktivicāra.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रमाणतत्त्वम् ॥

6633. PRAMĀṆATATTVAM.

Burnell's Catalogue No. 2242. Page 120. Left column. Substance—Paper. Size—9 × 1 inches. Sheets—12 Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—198. Author—Rāmacandrabhaṭṭācārya. Complete. Not printed.

Beginning:

श्रीगणाधिपतये नमः ।

अत्र प्रमाणत्त्वं विविच्यते तत्र प्रमाणं चतुर्विधम्, प्रत्यक्षानुमानोपमानशब्दभेदात् । अन्यथा विरुद्धप्रत्यक्षत्वानुमितित्वावच्छिन्नस्याविशेषापत्तेरिति । स्मृतिभिन्नज्ञानं प्रत्यक्षाभिन्नं वेत्याद्या विप्रतिप्रतिपत्तयः विधेः सामानाधिकरण्येन निषेधस्य चावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् । न वा सिद्धसाधनादि ।

End:

किमपराद्धं तर्हि । तद्धर्मिकतत्प्रकारकमानसेच्छाकालो सामान्यतो मानसेच्छाकल्पने च अनुकूलतर्कस्योभयत्राविशेषादिति तथा चैतज्जालकप्रतारणमात्रम् । नैतत्प्रामाण्यानुमित्यादौ मानसत्वकल्पनमित्याहुः अनुमितेर्मानसत्वविचारोऽयम् ।

Subject: Anumititattvavāda.

Remarks:—The Ms. is in a fairly good condition. On the last sheet is given:—

इदं पुस्तकं सुमापतिपण्डितानाम् ।

The author of this work is probably identical with the author of the Siddhānta Sāra, described under No.

The work is a treatise on Poetics, on the number, nature and definition of Pramāṇas.

॥ मङ्गलवादः ॥

6634. MAṄGALAVĀDAḤ.

Burnell's Catalogue No. 2340. Page 115. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—12. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—230. Author—Vaidyanāthadīkṣita. Incomplete. Not printed.

Beginning—Same as No.

End:

यद्वा सर्वस्यापि पदार्थस्यासङ्गतदङ्गसमुदायस्य प्राङ्कक्करणेह मध्ये न पूर्वमन्वय इत्याद्याः परिहाराः । उपकारविशिष्टस्य करणान्वय इत्याचार्यमतेन द्वितीयः । आचारमूलत्वादिवाक्यत्रयव्यवहितहेतूपपादकशङ्कामुभयार्थत्वशङ्का वा सन्निधानप्राप्तां.... ॥

Subject: Maṅgalavāda.

Remarks:—The Ms. is in a fairly good condition.

This tract represents only a portion of his commentary on Rucidatta's Prakāśa.

॥ वादार्थभावः ॥

6635. VĀDĀRTHABHĀVAḤ.

S. S. Collection No. 126 (d)

Substance—Palm leaf. Size—15¼ × 2 inches. Leaves—36. Lines—12 to a Page. Script—Grantha. No. of Granthas—1600. Author—Aśvatthabudha. Incomplete. Not printed

Beginning:

श्रीमद्गुरुचरणारविन्दाभ्यां नमः

यो रक्षोगणपीड्यमानभुवनं त्रातुं रघूणां कुले
श्रीरामाख्यमहेश्वरो विजयते लक्ष्मीसनाथस्सदा ।
तं भक्तार्ति(विभञ्जनैकनिपुणं) सीतापतिं सुन्दरं
काकुत्स्थं करुणानिधिं प्रणमतो भीतिः कुतो वा भवेत् ॥

श्रीमद्वत्सकुलप्रसूतमखिनः श्रीरामभद्रप्रभोः
पुत्रस्यार्यवरस्य दीक्षित...मणेः ।
पुत्रस्यास्य महामतेः बुधमहाहंभावबन्धच्छिदः
पुत्रोऽश्वत्थबुधस्तु साधु तनुते वादार्थभावान् मुदा ॥

श्रीगुरुचरणारविन्दाभ्यां नमः ।

...प्रत्यक्षादिना उपस्थितस्य समवायेन पदेन बोप-
स्थितस्य शाब्दबोधवारणाय विषयतासंबन्धेन शाब्दबोधं

प्रति विषयतासंबन्धेन पदनिरूपितवृत्ति......रणत्वमित्य-
वश्यं वाच्यं ।

End:

....विशेष्याभावस्य प्राप्तौ तद्व्यापकम् तस्य विशिष्टा-
भावस्यापि प्राप्तत्वेन तात्पर्यविषयत्वायोगात् । नखवि-
दलनाद्युपायस्य येषु व्रीहि...विशेष्यस्यावधाताभावस्य
विदलनाद्युपायान्तरप्रसक्तिप्रसञ्जितस्य विशेषणस्य च स-
त्त्वेन विशेष्याभावप्रयुक्तस्य विशेषणाभावप्रयुक्त.... ॥

Subject: Vādārthabhāvaḥ.

Remarks:—The Ms. is in a fairly good condition.

Nothing is known of the author of this tract, Vādārthabhāva, except that he is called Aśvattha & that he is the great grandson of one Rāmabhadra of the family of Vatsa.

॥ विधिवादः ॥

6636. VIDHIVĀDAḤ.

Burnell's Catalogue No. 2244. Page 120. Left column.

Substance—Paper. Size—10 × 3¾ inches. Sheets—61. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Rāmacandrasūrī. Incomplete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

ओदनकामः पचेत स्वर्गकामो यजेतेत्यादिविधिवाक्यं
पाकयागादौ प्रवर्तकं । तस्य च तथात्वं न साक्षात् ।
अव्युत्पन्नानां ततोऽप्रवृत्तेः ।

End :

तादृशस्य नित्यस्यासम्भवेन तस्य विश्वजिन्न्यायेन स्वर्गसाधनत्वं कल्प्यते प्रत्यवायपरीहाररूपेष्टसाधनत्व-स्यैव तत्र विध्यर्थत्वसंभवात् । तज्ज्ञानादेव तत्र प्रवृत्त्यु-पपत्तेश्चेति ॥

Colophon :

समाप्तोऽयं विधिवादः ॥

Snbject. Vidhivāda.

Remarks:—The Ms. is in a fairly good condition.

Evidently a south Indian Brāhmaṇa, of perhaps the 17th or the 18th century, Rāmacandrasūri is the author of the Vidhivāda noticed above. After refuting the views of philosophers belonging to other schools of thought, the author determines the meaning of Vidhi in the Nyāya system. Perhaps he is identical with Rāmabhadra, the author of Siddhānta Sāra, who had another name, Rāmacandra.

॥ सव्यभिचारलक्षणवादः ॥

6637. SAVYABHICĀRALAKṢAṆAVĀDAḤ.

Burnell's Catalogue No. 2296. Page 117. Right column. Substance—Paper. Size—11¼×5 inches. Sheets—14. Lines—9 to a Page. Script—Devanāgarī. No. of — Granthas 200. Author—Veṅkaṭācārya. Complete, Not printed.

Beginning :

श्रीगणेशाय नमः

चिन्तामणेरुत्तरखण्डलग्ने
सामान्यतस्सव्यभिचारचिह्ने ।
गादाधरे दीधितिटिप्पणे नः
शङ्का समुन्मीलति दुर्निवारा ॥

साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञान-विषयत्वे सति हेत्वभिमतस्स इति चिन्तामणौ पूर्वपक्षे सव्यभिचारसामान्यलक्षणं स्थितम् । तत्र साध्यसंशय-जनकत्वप्रयोजकत्वं कोटिद्वयोपस्थापकत्वे विवक्षितमिति वक्ष्यमाणदूषणपरिहाराय सर्वै सम्प्रतिपन्नम् । तदिदं किं यथाश्रुतरीतिपरिग्रहेण संभवति उत अन्यथेति संशये अन्यथेत्येव भट्टाचार्याः ॥

End:

तत्तदुद्देश्यतावच्छेदकधर्मिकतत्तद्विधेयतावच्छेदकप्रयो-जकतासंसर्गकसमानाधिकरणवाक्यजन्यशाब्दबुद्धित्वाव-च्छिन्नं प्रति तत्तद्विधेयपदप्राथम्यविशिष्टोद्देश्यताव-च्छेदकविशिष्टोपस्थापकशब्दसमभिव्याहृतविधेयतावच्छेद-कविशिष्टोपस्थापकसमानाधिकरणशब्दत्वरूपाकाङ्क्षाज्ञानस्य करणताकल्पने अनन्तगौरवरूपानन्त्यदोषापत्तेः । उद्देश्य-प्राथम्यानियमस्य महता ग्रन्थकृता दूषितत्वाच्च साध्यसंशय-जनकेत्यादेः अस्मदुक्तार्थपरिग्रह एव वाक्यविदां युक्त इति प्रतिभाति

Colophon:

चिल्लरवादः शिरोमणि वेङ्कटाचार्यकृतः ॥

Subject: The definition of the Hetvābhāsa, called Savyabhicara as given in Maṇi, Dīdhiti and Gadādhara's works is discussed here by one Śiromaṇi Veṅkaṭācārya.

Remarks—The Ms. is in a fairly good condition.

॥ सव्यभिचारलक्षणवादः ॥

6638. SAVYABHICĀRALAKṢAṆAVĀDAḤ.

Burnell's Catalogue No. 2297. Page 120. Left column. Substance—Paper. Size—11 × 4¾ inches. Sheets—11. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Appāśāstrin. Incomplete. Not Printed.

Beginning:

श्रीगणेशाय नमः ।

साध्यसन्देहजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतत्त्व इति मणिवाक्यम् । अत्र दीधितिः । कोटिद्वयोपस्थापकं सत् साध्यसन्देहजनकं साध्यसन्देहजनककोटिद्वयोपस्थितिजनकमिति यावत् इति । तत्र महाचार्याः— साध्यसन्देहजनकेत्यादि यथाश्रुतमूलात् साध्यसन्देहजनकत्वकोटिद्वयोपस्थापकत्वोभयवैशिष्ट्यं प्रत्याय्यते । तत्र च वक्ष्यमाणाति 'व्याप्तेर्दुर्वारत्वम्' इत्यादिना । 'अतो अन्यथा व्याचष्टे' इत्यन्तेन दीधितिं अवतारयामासुः ॥

End:

प्रकृतानुमितितद्विरोधित्वाभावेन तद्विरोध्यनुमिति-

जनकत्वाभावेन च प्रतिपक्षलक्षणासंस्पर्शेन भवदुक्तानु-
मानस्य प्रकृतानुपयोगमिति सदसद्विवेचनचतुरैः निर्म-
त्सरैः सुधीभिः सम्यग्विभावनीयम् ॥ अन्यदपि यत्कि-
ञ्चित् गौरवाद्यापादनम्। तत्तु परिहृतप्रायत्वात् अतिवि-
स्तरभयाच्च उपेक्षितं इत्यलं पल्लवितेन ।

Colophon:

अण्णाशास्त्रिकृतानिरुक्त (*Siems*) वादः

Subject: Savyabhicāralakṣaṇavāda.

Remarks:—The Ms. is in a fairly good condition.

॥ सव्यभिचारलक्षणवादः ॥

6639. SAVYABHICĀRALAKṢAṆAVĀDAḤ.

Burnell's Catalogue No. 2298. Page 120. Left column. Substance—Paper. Size—10 × 4¼ inches. Sheets—11. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Appāśāstrin. Incomplete. Not printed.

Beginning, end, colophon and subject—Same as No. 6638.

Remarks:—The Ms. is in a fairly good condition.

॥ सङ्कीर्णवादाः ॥

MISCELLANEOUS TRACTS.

|| अनुमानखण्डव्याख्या ||

6640. ANUMĀNAKHAṆḌAVYĀKHYĀ.

Burnell's Catalogue No. 10946. Page 121. Right column. Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—23. Lines—8 to a Page. Script—Grantha. No. of Granthas—460. Author—?. Complete. Not printed.

Beginning:

नन्वत्र पूर्वत्रादिना मीमांसकमसकृद्दर्शनव्याप्तिग्राहक तायाः स्वयमेव निराकरणात् अनुमानप्रामाण्योपसंहाराच्च नापि चार्वाकः सकृद्दर्शन........क्वचिदुपपादनादित्यत आह ॥ अस्त्विति ॥ सकृद्दर्शनगम्यत्वाङ्गीकारभ्रमं वारयति । सकृद्दर्शनेति । प्रत्यभिज्ञायामिवेति ॥

End:

ननु तत्राविशेषितेनेति विशेषणात् कथं तत्संग्रह इत्याशंक्याह । स्वयं लक्षणेति । तत्रे...लक्ष्यतावच्छेदक इत्यर्थः । अन्यथेति । स्वविवक्षितलक्षणानुरोधेन लक्ष्यतावच्छेदकनिर्वचन इत्यर्थः । स्वव्यभिचारमात्रेण साक्षात् शुद्धसाध्यव्यभिचारादुमितिजनकत्वमित्यर्थः ॥

Subject: Anumānakhaṇḍavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

॥ अनुमाननिरूपणम् ॥

6641. ANUMĀNANIRŪPAṆAM.

Burnell's Catalogue No. 10947b. Page 121. Right column. Substance—Palm leaf. Size—$17\frac{3}{4} \times 1\frac{3}{4}$ inches. Leaves—9. Lines—8 to a Page. Script—Grantha. No. of Granthas—168. Author—?. Incomplete. Not printed.

Beginning:

प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावसंगत्या प्रत्यक्षानन्तरमनुमानं निरूप्यते । यद्यपि लिङ्गपक्षव्याप्तिज्ञानादीनामनुमितिरूपत्वनियमे तस्याप्रसङ्गेन प्रत्यक्षरूपत्वमंगीकरणीयम् । अतीन्द्रियादिसाध्यकस्थलेऽपि परंपरया प्रत्यक्षापेक्षितत्वमिति ॥

End:

तासां धूमत्वावच्छेद्यत्वात् । तादृशप्रतियोगितात्वावच्छिन्नानतिरिक्तवृत्तित्वात् ।

Subject: Anumānanirūpaṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ अन्यथाख्यातिवादः ॥

6642. ANYATHĀKHYĀTIVĀDAḤ.

Burnell's Catalogue No. 10952a. Page 121. Right column Substance—Palm leaf. Size—$13\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—28. Lines—6 to a Page. Script—Grantha. No. of Granthas—250. Author—?. Incomplete. Not printed.

Beginning:

...स्वतन्त्रान्वयव्यतिरेकादिष्टज्ञानं हेतुरेव न त्वितर-
हेतुतावच्छेदकमन्यथासिद्धम् । न हीष्टज्ञानमादायैव भेदा-
ग्रहस्यान्वयव्यतिरेकौ० ॥

End:

रसनगतपित्तद्रव्यस्योद्भूतपित्तरसस्य वायूपनीतसुर-
भिद्रव्यस्य वा प्रत्यक्षतापत्तेः । मैवम् । नोद्भूतरूपत्वं तथा
नयनगतपित्तद्रव्यस्य प्रत्यक्षतापत्तेः । अस्तु वा उद्भूतस्प-
र्शवत्त्वं तन्त्रम् । न चैवं प्र... ॥

Colophon: Leaf No. 7.

इत्यन्यथाख्यातिवादः ॥

Subject: Anyathākhyātivāda.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is:—

हेत्वाभासव्याख्या ।

॥ असमवायिकारणनाशाद्द्रव्यनाशवादः ॥

6643. ASAMAVĀYIKĀRAṆANĀŚĀD-DRAVYANĀŚAVĀDAḤ.

Burnell's Catalogue No. 2292. Page 120. Right column. Substance—Paper. 12×6 inches. Sheets—7. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—?. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

असमवायिकारणनाशादेव द्रव्यनाशः। द्व्यणुकनाश-स्थले समवायिकारणनाशस्यासंभवात्। तत्रासमवायि-कारणनाशस्य हेतुत्वे कल्प्यमाने लाघवाद्द्रव्यनाशस्त-स्यैव कार्यतावच्छेदकत्वं कल्प्यते। न तु द्व्यणुकनाशस्य गौरवात्।

End:

एवञ्चापरमपि लाघवं तत्तत्पुरुषीयत्वादिमिश्रिते तत्तद्धर्म्यादिमिश्रितेवा बाधनिश्चयप्रतिबध्यतावच्छेदके-ऽपि रूपदोषविशेषस्यानिवेशादिति पुनरास्माकीनाभिनवः पन्थाः॥

Colophon:

इति असमवायिकारणनाशाद्द्रव्यनाशवादः समाप्तः॥

Subject: Asamavāyikāraṇanāśāddravyanāśavāda.

Remarks:—The Ms. is in a fairly good condition. On the title page is given:

हे पुस्तक श्रीमन्तराजेश्रीशरभोजिमहाराजसाहेबयांच्य कारकर्तींत लि-हिलें अस्सें।

॥ आकांक्षावादः ॥

6644. ĀKĀṄKṢĀVĀDAḤ.

Burnell's Catalogue No. 10951a. Page 121. Right column. Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—11 (क-ट). Lines—9 to a Page. Script—Grantha. No. of Granthas—300. Author—? Incomplete. Wants end. Not printed.

Beginning:

ॐ आकाङ्क्षाया लक्षणमुच्यते । पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा । अन्वयाननुभावकत्वमात्रे कृते घटः कर्मत्वमित्यत्रातिव्याप्तिः । ततः पदान्तरव्यतिरेके घटः कर्मत्वमित्यन्वयाननुभावकत्वं न पदव्यतिरेकप्रयुक्तम् किं स्वरूपायोग्यत्वप्रयुक्तम् । अन्यथा पदान्तरसमभिव्याहारदशायां निराकाङ्क्षस्यान्वयबोधकत्वापत्तेः ।

End:

अत्र त्ववच्छेदकान्तराभावेनाकाङ्क्षाविशिष्टशब्दत्वमेव जनकतावच्छेदकमित्युक्तत्वात् । तस्मादाकांक्षाविरहादेव घटः कर्मत्वमित्यादेः स्वरूपयोग्यत्वम् । तत्र च पदव्यतिरेकप्रयुक्तत्वविशेषणं विना न तद्विरह इति तद्विशेषणमावश्यकमेवेति युक्तः पन्थाः ॥ तदेतत्सर्वमभिसन्धायाह ॥ इतिसंक्षेप इति ॥ नन्वग्निना सिञ्चेदित्यादेरपि... ।

Subject: Ākāṅkṣāvāda.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are:

1 Ākāṅkṣāvāda,

2 A commentary on some work,

and some fragmentary leaves at the beginning containing the same subject.

॥ आकाङ्क्षावादः ॥

6645. ĀKĀṄKṢĀVĀDAḤ.

Burnell's Catalogue No. 10951. Page 121. Right column. Substance— Palm leaf. Size—$16\frac{1}{4}\times1\frac{1}{2}$ inches. Leaves—31. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—560. Author—? Incomplete. Not printed.

Beginning:

पदान्तरव्यतिरेकप्रयुक्ततात्पर्यविषयान्वयाननुभावकत्व-
माकाङ्क्षा । ....ङ्क्षा घटमानयेत्यत्र वर्तते। घटमिति
पदस्यानयेति पदं विना आनयेति पदस्य घटमिति पदं
विना तात्पर्यविषयघटकर्मकानयनक्रियाकसंसर्गान्वयाननु-
भावकत्वं वर्तत इति लक्ष्ये लक्षणसमन्वयः ।

End:

जन्यत्वाभावापेक्षया शरीरजन्यत्वाभावस्यातिरिक्तत-
या एकस्मिन् धर्मिणि जन्यत्वाभावत्वशरीरजन्यत्वाभाव-
त्वयोः समावेशाभावेन व्यर्थविशेषणत्वशङ्कानवकाशात् ।
ननूभयोस्तुल्यबलत्वाभावान्न सत्प्रतिपक्षता । तथा हि
कर्तृजन्यत्वावच्छेदकं कार्यत्वं घट.... ।

Subject: Ākāṅkṣāvāda.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No.6644

॥ आख्यातार्थविचारः ॥

6646. ĀKHYĀTĀRTHAVICĀRAḤ.

N. S. Collection No. 35b. Substance—Paper. Size—$12\frac{1}{2}\times4$

inches. Sheets — 6. Lines — 9 to a Page. Script—Devanāgarī. No. of Granthas — 250. Author—? Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

संसर्गाभावश्चान्योन्याभावश्च नञोर्थः । तत्र अन्वयिताव-च्छेदकावच्छिन्नप्रतियोगिताक....त्ति न घटः नीलो न घटो न घटः इत्याद्यव्यवहारात् । इह नीलो घट इति न पीतो घट इति पीतो घटो न नीलो घट इत्यादिव्यव-हाराच्च ।

End:

कथं....वैकत्वगोत्वोभयविशिष्टबुद्धौ गोपदजन्यत्वसङ्के-तः । शुद्धगोत्वावच्छिन्ने गोपदस्य न संगतिः । गौरित्य-त्रैकवचनसहकृतेन गोपदेन तदुभयप्रकारकबुद्धिजन-नात् । तदितरप्रकारकत्वानि... ।

Subject: Ākhyātārthavicāra.

Remarks:—The Ms. is in a fairly good condition.

॥ आख्यातवादः ॥

6647. ĀKHYĀTAVĀDAḤ.
Burnell's Catalogue No. 6387. Page 11. Right column. Substance—Paper. Size—$12\frac{1}{2} \times 5$ inches. Sheets—6. Lines—8 to a page. Script—Devanāgarī. No. of Granthas—100. Author—Patañjali. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6696.

Remarks:—The Ms. is in a very dacaying condition. After the colophon is given:—

" सांख्यसूत्रम् ॥

अथ त्रिविधदुःखात्यन्तानिवृत्तिरत्यन्तपुरुषार्थः । न दृष्टात्तत्सान्निविन्निवृत्तैरप्यनन्तरत्वादर्शनात् ॥ * * *

तीर्थानि तोयपूर्णानि देवान्काष्ठादिनिर्मितान् ।
योगिनोऽनुपपद्यन्ते स्वात्मप्रत्ययकारिणः ॥

धनन्तस्य भजेत्सैव शैवी चेश्वरयसन्तति: ।

नास्ति चेत्तच्छिवे दद्यान्न दद्यात्पशुसन्ततौ ॥

इत्यादिमहापुराणे श्रीशैवे वायवीयसंहितायामुपरिभागे एकोनत्रिंशोऽध्यायः ॥ सूत उवाच ॥"

॥ पातञ्जलयोगसूत्रम् ॥

6698. PĀTAÑJALAYOGASŪTRAM.

Burnell's Catalogue No. 9908 (a). Page—Right column. Substance—Palm leaf. Size—18¾ × 1⅛ inches. Leaves—2. Lines—12 to a Page. Script—Grantha. No. of Granthas—100 Author—Patañjali. Complete. Printed.

Beginning:

यत्कटाक्षसुधालेशैः वारितो जन्मवारिधेः ।
श्रीसदाशिवयोगीन्द्रं तमहं मुक्तिदं भजे ॥ १ ॥

यत्कृपाबलतोऽस्माकं चित्तशुद्धिरभूत्स्वयम् ।
तमानन्दगुरुं वन्दे सच्चिदानन्दरूपिणम् ॥ २ ॥

पूर्वं निर्गुणवस्तु नित्यममलं सत्यं विशुद्धात्मकं
पश्चात्स्वीयजडं प्रविश्य सकलाकारेण यत्संस्थितम् ।
रूपः शिष्यगणान् स्वकीर्तिलहरीदिव्यामृतं पायय-
न्नस्मद्देशिकशेखरो विजयते लोकैकदीपाङ्कुरः ॥ ३ ॥

यत्पादांबुजसेवयाऽमलमतिः संसारसौख्यं जह-
ञ्छ्रुत्वा तत्त्वमसीति वाक्यनिचयं मत्वा तदर्थं परम् ।
ध्यात्वा सन्ततमान्तरं प्रविततं प्राप्तात्मतत्त्वोऽभवत्
तां वन्दे परदेवतां सुरनुतां चिन्मात्रगात्रीं शिवाम् ॥ ४ ॥

अथ योगानुशासनम्० ॥ Same as No. 6696.

End, colophon and subject—Same as No. 6696.

Remarks:—The Ms. is in good condition. The other work contained herein is Yogasudhākara.

After the colophon is given—

आहत्य सूत्राणि २०६ ॥ ओं ।

श्रीरामं श्रितपारिजातमनघं श्रीवित्सभं श्यामलं

केयूराङ्गदरत्नचित्रमकुटैरन्यैस्तथा भूषणैः ।

युक्तं निर्जितचन्द्रवक्त्रविलसन्नेत्रांबुजाभ्यां सदा

चिन्मुद्राविलसत्कराम्बुजमहं सीतासमेतं भजे ॥

Dr. Burnell does not notice this work under this number.

॥ पातञ्जलयोगसूत्रम् ॥

6699. PĀTAÑJALAYOGASŪTRAM.

K. M. Collection No. 48.

Substance—Paper. Size—$8\frac{1}{4} \times 5\frac{1}{2}$ inches. Sheets—2. Lines—18 to a page. Script—Devanāgarī. No. of Granthas—100. Author—Patañjali. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6696.

Remarks:—The Ms. is in a fairly good condition.

॥ पातञ्जलयोगसूत्रम् ॥

6700. PĀTAÑJALAYOGASŪTRAM.

Burnell's Catalogue No. 10886(c). Page Right column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves —1-8 at the end. Lines—4-5 to a Page. Script—Grantha. No. of Granthas—100. Author—Patañjali. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6696.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 4583.

Dr. Burnell does not notice this work under No. 10886.

॥ योगसूत्रभाष्यम् ॥

6701. YOGASŪTRABHĀṢYAM.

Burnell's Catalogue No. 6386. Page 111. Right column. Substance—Paper. Size—$12\frac{3}{4} \times 4\frac{3}{4}$ inches. Sheets—37. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—Vyāsa. Complete. Printed.

Beginning:

अथ योगानुशासनम् ॥

अथेत्ययमधिकारार्थः । योगानुशासनं शास्त्रमधिकृतं वेदितव्यम् । योगः समाधिः । स च सार्वभौमः चित्तस्य धर्मः । क्षिप्तं, मूढं, विक्षिप्तं, एकाग्रं, निरुद्धमिति चित्तभूमयः ।

End:

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा च चिच्छक्तेरिति ॥

कृतभोगापवर्गाणां पुरुषार्थानां यः प्रतिप्रसवः कार्यकारणात्मनां तत्कैवल्यं स्वरूपप्रतिष्ठानं(वा) पुनर्बुद्धिसन्तानासम्बन्धनीया पुरुषस्य चिच्छक्तिरेव केवला तस्यास्तथैव भावः कैवल्यमिति ।

Colophon:

इति पातञ्जले योगशास्त्रे सांख्ययोगे योगाध्याये कैवल्यपादः चतुर्थः ।

Remarks:—The Ms. is in a very much decaying condition. The other work contained herein is Yogasūtrabhāṣyavyākhyā by Vācaspatimiśra.

The author of the Bhāṣya on the Yogasūtras cannot be, held to be the same as the great codifier and compiler of the Vedas and the author of the Mahābhārata. While in his commentary on Vyāsa's Bhāṣya, Vācaspati says at the outset that this Vyāsa is the same as the great Dvaipāyana, he says here and there in the middle that the Anuṣṭub verses quoted by the Bhāṣyakāra are 'Vaiyasikī gāthā'. Thus Vācaspati believes both ways.

Vyāsa quotes Pañcaśikha and Vārṣagaṇya.

The probable date of this author is somewhere before the 4th century A. D. The work has been published in the Ānandāśrama Sanskrit Series.

॥ योगसूत्रभाष्यम् ॥

6702. YOGASŪTRABHĀṢYAM.

Burnell's Catalogue No. 9903(a). Page 111. Right column. Substance—Palm leaf. Size—18⅝ × 1⅝ inches. Leaves—38 (2-39). Lines—9 to a Page. Script—Grantha. No. of Granthas—1200. Author—Vyāsa. Complete. Printed.

Beginning:

विवेक्ता चित्तहंसो मे चिज्जडक्षीरनीरयोः ।
नारायणेन्द्रयोगीन्द्रपादपद्मे विराजते ॥ १ ॥

मंगलाय जगतां हिरण्मये
तन्वते सदसि ताण्डवं सदा ।
विश्वजन्मधृतिभङ्गहेतवे
कुर्महे नम इदं कपर्दिने ॥

अथ योग० Same as No. 6701.

End, colophon and subject same as No. 6701.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are—

(1) Māntrikopaniṣad.
(2) Yogaśikhopaniṣad.
(3) Mantropaniṣad.

॥ योगसूत्रभाष्यम् ॥

6703. YOGASŪTRABHĀṢYAM.

Burnell's Catalogue No. 9904. Page 111. Right column.

Substance—Palm leaf. Size—17⅛ × 1½ inches. Leaves—68 (142-209). Lines—9 to a Page. Script—Grantha. No. of Granthas—1200. Author—Vyāsa. Complete. Printed.

Beginning, end and subject—Same as No. 6701.

Colophon:

इति पातञ्जले सांख्यप्रवचने योगाध्याये कैवल्यपादः चतुर्थः ॥
समाप्तं चेदं शास्त्रम् ॥

सुप्तश्चतत्त्वलीनानां तनुदग्धाश्च योगिनां ।
विच्छिन्नोदाररूपाश्च क्लेशा विषयसंगिनाम् ॥

योगस्योद्देशनिर्देशौ तदर्थं वृत्तिलक्षणम् ।
योगोपायाः प्रभेदाश्च पादेऽस्मिन्नुपवर्णिताः ॥

ओं नमो भगवते पतञ्जलये ।
इति योगपातञ्जलभाष्यं समाप्तम् ।

श्रीसांबशिवाय नमः । श्रीरामचन्द्राय नमः । वेङ्कटाचलस्वामि-सहायम(:) ।

Remarks:—The Ms. is in a fairly good condition.

॥ योगसूत्रभाष्यम् ॥

6704. YOGASŪTRABHĀṢYAM.

P. A. Collection No. 126.

Substance—Paper. Size—6⅓ × 4½ inches. Sheets—108. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Vyāsa. Complete. Printed.

Beginning, end and subject—Same as No. 6701.

Colophon:

इति श्री पातञ्जलयोगशास्त्रे सांख्यप्रवचने कैवल्यपादः समाप्तः ॥

विरोधिकृत् संवत्सरे माघमासे पञ्चम्यां अर्कवासरे समाप्तम् ।

इदं पुस्तकं बालाजिना लिखितम् ।

Subject: Yogasūtrabhāṣyam.

Remarks:—The Ms. is in good condition.

॥ योगभाष्यव्याख्या ॥

6705. YOGABHĀṢYAVYĀKHYĀ.

Burnell's Catalogue No. 6386 b. Page 111. Right column. Substance—Paper. Size—$12\frac{3}{4} \times 4\frac{3}{4}$ inches. Sheets—60 (88-167). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4800. Author—Vācaspatimiśra. Complete. Printed.

Beginning:

नमामि जगदुत्पत्ति हेतवे वृषकेतवे ।

क्लेशकर्मविपाकादिरहिताय हिताय च ॥

नत्वा पतञ्जलिमुनिं वेदव्यासेन भाषिते ।

संक्षिप्तस्पष्टबह्वर्थभाष्ये व्याख्याभिधास्यते ॥

इह भगवान् पतञ्जलिरारिप्सितस्य संक्षेपतः तात्पर्यार्थं प्रेक्षावत्प्रवृत्त्यङ्गम् श्रोतुश्च सुखप्रहार्यं आदावेव सूत्रमारचयां चकार ॥ 'अथ योगानुशासनम्' ॥ तत्र प्रथमावयवमथशब्दं व्याचष्टे । अथेत्ययमधिकारार्थः ॥

End:

अस्ति हि महाप्रलये स्वरूपप्रतिष्ठा चिच्छक्तेरिति । न चासौ मोक्ष इत्यत आह पुनरिति । सूत्र इति शब्दः शास्त्रपरिसमाप्तौ ।

युक्त्या हि चित्रं परलोकमेय-
ज्ञसिद्धये धर्मघनः समाधिः ।
द्वितीय मुक्तिः(प्रतिपादितास्मि)मन्
पादे प्रसंगादपि चान्यदुक्तम् ॥

निदानं तापानामुदितमथ तापाश्चकथिताः
सहांगैरष्टाभिः उदितमिहयोगद्वयमपि ।
कृतो मुक्तेरध्वा गुणपुरुषभेद (स्स्फुटतरो)
(वि)विक्तं कैवल्यं परिगलिततापा चितिरसौ ॥

Colophon:

इति श्रीवाचस्पतिमिश्रविरचितायां पातञ्जलभाष्यव्याख्यायां कैवल्य-
पादश्चतुर्थः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Remarks :—The Ms. is in a decaying condition. The other work contained herein is Yogabhāṣya.

Vācaspatimiśra, the author of this commentary, called Tattvavaiśāradī on the Yogasūtrabhāṣya of Vyāsa, is the great sarvatantrasvatantra, the author of Nyāyavārtikatātparyaṭīkā, Bhāmati etc. He was the pupil of one Trilocana. His date is, according to the data furnished by himself in his Nyāyasūcīnibandha, Samvat 898 (i.e.) A. D. 841.

The work has been published in the Ānandāśrama Sanskrit Series.

॥ योगसूत्रभाष्यव्याख्या ॥

6706. YOGASŪTRABHĀṢYAVYĀKHYĀ.

Burnell's Catalogue No. 9905. Page 112. Left column. Substance—Palm leaf. Size—18¾ × 1½ inches. Leaves—88. Lines—9 to a Page. Script—Grantha. No. of Granthas—4800. Author—Vācaspatimiśra. Complete. Printed.

Beginning, end and subject—Same as No. 6705.

Colophon:

इति वाचस्पतिमिश्रविरचितायां पातञ्जलयोगभाष्यव्याख्यायां कैवल्यपादः चतुर्थः ।

नारायणेन्द्रयोगीन्द्रपादपङ्केरुहद्वयी ।
कलहंसाय मे दद्यात् कैवल्यमधु चिन्तिता ॥

Remarks:—The Ms. is in a fairly good condition.

॥ योगसूत्रवृत्तिः ॥

6707. YOGASŪTRAVṚTTIḤ.

Burnell's Catalogue No. 6392. Page 112. Left column. Substance—Paper. Size—13 × 5 inches. Sheets—42 (178-220.) Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Bhojarājā. Complete. Printed.

Beginning:

श्रीहयग्रीवाय नमः ।

देहार्धयोगश्शिवयोः सः श्रेयांसि तनोतु वः ।

दुष्प्रापमपि यत्स्मृत्या जनः कैवल्यमश्नुते ॥

* * *

अथ योगानुशासनं ॥ अनेन सूत्रेण शास्त्रस्य संबन्धाभिधेयप्रयोजनान्याख्यायन्ते । अथशब्दोऽधिकारद्योतको मङ्गलार्थश्च ॥

End:

कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोऽर्थानभिधाय कैवल्यस्वरूपं निर्णीतमिति व्याकृतः कैवल्यपादः ।

Colophon:

इति पातञ्जलयोगशास्त्रसूत्रवृत्तौ कैवल्यपादः चतुर्थः समाप्तः ।

Remarks:—The Ms. is in a very much decaying condition.

Till recently, the author of this commentary on the Yoga-sūtras, was believed to be the same as the polymāth, Bhoja, King of Dhārā. Mr. Rāmaśarma, in his Samskṛt introduction to the Chowkhāmba edition of the Māṭharavṛtti, draws our attention to a quotation in Jayanta's Nyāya Mañjari—from which we come to learn that this Bhoja is the author of a commentary on the Sāṅkhya Kārikās of Īśvarakṛṣṇa also and that he is different from the famous King of Dhār, the author of Śṛṅgāraprakāśikā etc.

The work has been published in the Ānadāśrama Samskṛt Series.

॥ योगसूत्रव्याख्या—सूत्रार्थचन्द्रिका ॥

6708. YOGASŪTRAVYĀKHYĀ—SŪTRĀRTHACANDRIKĀ.

Burnell's Catalogue No. 6379. Page 112. Left column. Substance—Paper. Size—$12\frac{1}{2} \times 5$ inches. Sheets—18. Lines—2-14 to a Page. Script—Devanāgarī. No. of Granthas—380. Author—Ananta. Complete. Printed.

Beginning:

गुरुं प्रणम्य सूत्रार्थचन्द्रिका क्रियते मया ।
अनन्तेनेश्वरप्रीत्यै सच्चिदानन्दरूपिणम् ॥

अथ योगानुशासनम् ॥ अथ शब्दोऽधिकारणवाची । योगो नाम समाधानमनुशिष्यते व्याख्यायते येन तत् ॥ १ ॥ सत्वपरिणामरूपस्य चित्तस्य वृत्तयस्तासां निरोधो बहिर्मुखताविच्छेदादन्तर्मुखतया स्वकारणे लयः ॥ २ ॥

End:

यस्माच्छास्त्रान्तरेष्वप्येवमेव निश्चयः तस्मादिदमेव युक्तम् वृत्तिसारूप्यपरिहारेण स्वरूपप्रतिष्ठावि(चि)तिशक्तिकैवल्यमिति । तदेवं सिद्ध्यन्तरेभ्यो विलक्षणा सर्वसिद्धिमूलभूता समाधिसिद्धिः सैव साधनीयेति ॥ ३३ ॥

Colophon:

सूत्रार्थवृत्तिमालोच्य कृतेयं पदचन्द्रिका ।
अनन्तेनेश्वरप्रीत्यै चार्पिता शिवपादयोः ॥

इति योगसूत्रव्याख्यायां चतुर्थः पादः ॥

Subject: Yogasūtravyākhyā otherwise known as Candrikā.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

पातञ्जलसूत्रारंभः । ग्रन्थाः ६०० । हे पुस्तकश्रीमंतराजेश्रीशरभोजि-
महाराजसाहेबयांच कारकर्तीत काशीदेशाहून खरीदीकरून आणिलें
असें ।

The author of this commentary Padacandrikā, which is based on Bhoja's Vṛtti, is Ananta. Nothing more is known of him.

The work has been published by the Śrī Vāṇī Vilās Press, Srirangam.

॥ पातञ्जलयोगसूत्रवृत्तिः—योगसुधाकरः ॥

6709. PĀTAÑJALAYOGASŪTRAVṚTTIḤ—YOGASUDHĀKARAḤ.

Burnell's Catalogue No. 9308 b. Page 112. Right column.

Substance—Palm leaf. Size—$14\frac{1}{2} \times 2\frac{1}{2}$ inches. Leaves—20 (3-22). Lines—11 to a Page. Script—Grantha. No. of Granthas—1000. Author—Sadāśivendrasarasvatī. Complete. Printed.

Beginning:

यज्ज्ञानदवाग्नीयं प्रत्यक्चितिरनामया ।
क्लेशकर्माद्यसंस्पृष्टं तमीशं कंचनाभजे ॥ १ ॥

श्रीमत्पतञ्जलेस्तस्य पदद्वन्द्वमनिन्दितम् ।
वन्दे येन मनःकायवाचां शुद्धिरकार्यसौ ॥ २ ॥

विद्यारत्नं मया लब्धं यत्कृपापारवारिधेः ।
वन्दे बुधैर्वन्द्य(मा)नवन्दकानन्ददान् गुरून् ॥ ३ ॥

श्रीमद्देशिकवक्त्राब्जात् निशम्याथ विलोच्यताम् ।
फणीन्द्रफणितेः काचिद्वृत्तिरारभ्यते मया ॥ ४ ॥

इह खलु भगवान् पतञ्जलिः प्रेक्षावत्प्रवृत्त्यौपयिकं शास्त्रप्रतिपाद्यं दर्शयति ।

End:

पुरुषार्थशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥' कृतभोगापवर्गाणां कार्यकारणात्मनां गुणानां प्रधाने प्रतिप्रसवः प्रलयः कैवल्यं ॥ * * *

इतिशब्दः शास्त्रपरिसमाप्तिद्योतनार्थः ।

यत्कृपापोतमासाद्य समुत्तीर्णो भवार्णवात् ।
नमोऽस्तु तस्मै गुरवे स्वाविद्याध्वान्तभानवे ॥

क्वाहं क्व योगसरणिर्गहनार्था तथाप्यहम् ।
श्रीगुरोः कृपया कुर्वे वृत्तिं योगसुधाकरम् ॥

फणीन्द्रसूक्तग्रथिता मद्वाङ्मौक्तिकमालिका ।
समर्प्यते मया श्रीमद्गुरोश्चरणपङ्कजे ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपा-

दाब्जसेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां श्रीपतञ्जलिप्रणीतयोगशास्त्रे सांख्यप्रवचननामधेये योगसुधाकराभिधायां वृत्तौ कैवल्यपादः चतुर्थः समाप्तः ॥

समाप्तश्चाध्यायः ॥ समाप्तं योगशास्त्रम् ॥

सदाशिवेन्द्रभारत्या श्रीगुरोः पादसेवनात् ।
संसारनरकाम्भोधेर्गलितोऽहं सुवालिशः ॥

Subject: Yogasūtravṛtti otherwise known as Yogasudhākara.

Remarks:—The Ms. is in good condition. After the colophon is given

श्रीरामं भद्रपीठस्थितमवनिसुताबाहुवल्लीविमर्श-
व्यासक्तं लक्ष्मणाद्यैरनुपदमनुजैः सेव्यमव्याजभक्त्या ।
पूज्यं शश्वद्वसिष्ठप्रमुखमुनिगणैः पुष्पहस्तैर्हनूमत्-
पाणिद्वंद्वोपचारैः सुखितमृदुपदाम्भोजमानन्दमीडे ॥

The other work contained herein is—Yogasūtra. At the end there is one stray leaf containing a commentary on the Yogasūtra.

To none in South India is unknown the history of the famous Sri Sadāśivendra Sarasvati, the author of this commentary on the Yoga aphorisms. He lived in the beginning of the 18th century and was the contemporary and class-mate of the famous Rāmabhadradīkṣita and Ayyavāl (Srī Venkateśa). He read at Tiruviśanallūr, and his preceptor in yoga was Paramaśivendra Sarasvati. He became a Bramhajñanin and finally had his Samādi at Nerūr. Some of his other works are—

(1) Brahmasūtravṛtti—a commentary on Vyāsa's Brahma Sūtras.

(2) Siddhānta Kalpa Vallī—a poetic version of Srī Appayyadīkṣita's Siddhāntaleśasaṅgraha and a commentary thereon called Kesaravallī.

(3) Advaita Rasa Manjarī—a short poem of 45 stanzas describing the essence of Advaita philosophy.

(4) Ātmavidyāvilāsa—a little poem of 62 Āryas in eulogy of the jñānin.

(5) He has also written Vṛttis for about a dozen Upaniṣads and also some Kīrtanas, both Vedāntic and devotional. (Vide. Samskṛt and English introduction to the Śrī Vāṇī Vilās editions of his Yoga Sudhākara & Brahmasūtravṛtti, for an account of the complete life of this yogin). The Śrī Vāṇī Vilās Press of Srirangam has brought out a good edition of this work, as also of some of the other works of his.

॥ हठयोगः ॥

HAṬHAYOGAḤ.

॥ हठप्रदीपिका ॥

6710. HAṬHAPRADĪPIKĀ.

Burnell's Catalogue No. 6380. Page 112. Left column. Substance—Paper. Size—10¾ × 5 inches. Sheets—20. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—457. Author—Svātmārāmayogin. Complete. Printed.

Beginning:

श्रीमङ्गलमूर्तये नमः ॥

श्री आदिनाथाय नमोऽस्तु तस्मै येनोपदिष्टा हठयोगविद्या ।
विराजते प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहिणीव ॥ १ ॥

प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठविद्योपदिश्यते ॥ २ ॥

भ्राता(न्त्या)बहुमतध्वान्ते राजयोगमजानतः ।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥ ३ ॥

हठविद्या हि मत्स्येन्द्र गोरक्षाद्या विजानते ।
स्वात्मारामोऽथवा योगी जानीते तत्प्रसादतः ॥ ४ ॥

श्री आदिनाथमत्स्येन्द्रशाबरानन्दभैरवाः ।
चौरंगीमीनगोरक्षविरूपाक्षबिलेशयाः ॥ ५ ॥

End:

दृष्टिः स्थिरा यस्य विनैव दृश्यात्

वायुः स्थिरो यस्य विना प्रयत्नात् ।

चित्तं स्थिरं यस्य विनाऽवलम्बात्

स एव योगी स गुरुः सुसेव्यः ॥ २५ ॥

प्रवेशे निर्गमे वामे दक्षिणे चोर्ध्वमप्यधः ।

न यस्य वायुर्वहति स मुक्तो नात्र संशयः ॥ २६ ॥

सर्वे हठलयाभ्यासा राजयोगस्य सिद्धये ।

राजयोगसमारूढः पुरुषः कालवञ्चकः ॥ २७ ॥

इति सकलयोगशास्त्रसिन्धोः

परमार्थि(थि)तादवकृष्टसारभूतम् ।

अभवद(?)हठामृतं यमीन्द्रा

यदि भवतामजरामृतत्ववाञ्छा ॥ २८ ॥

Colophon:

इति श्रीसद्गुरुसहजानन्दसन्तानचिन्तामणिस्वात्मारामविरचितायां हठप्रदीपिकायां चतुर्थोपदेशः समाप्तश्च ग्रन्थः ॥

Subject: Haṭhapradīpikā.

Remarks:—The Ms. is in fairly good condition.

This work has been printed with Bengali and Hindi translations, together with its Saṃskṛt commentaries from Calcutta and Ahmadabad. We have an edition of it with English translation in the "Sacred Books of the Hindus" Vol. XV.

HAṬHAPRADĪPIKĀ.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet	Script	Complete or otherwise.
6711	B. L. 6881	Paper.	$10\frac{1}{4} \times 4\frac{1}{2}$	12	12	Devanāgarī.	Incomplete; 3 Upadeśas only.
6712	,, 9913	Palm leaf.	$15 \times 1\frac{1}{4}$	16 (14-29)	8	Telugu.	Complete.
6713	,, 11440d	,,	$8\frac{3}{16} \times 1\frac{9}{16}$	12	6	,,	Incomplete; 4th Upadeśa only.
6714	K. M. 92	Paper.	$8\frac{1}{4} \times 5\frac{1}{2}$	12	17	,,	Complete.

DETAILED REMARKS
on the
MSS. IN THE ABOVE TABLE.

6712 Ther are 2 broken leaves at the end dealing with the Ṣaḍādhāras. Dr. Burnell has wrongly described this Ms. as Amanaskayoga.

6713 For the other works contained herein see remarks under No. 6724. Dr. Burnell does not notice this work under that No.

॥ हठरत्नावली ॥

6715. HAṬHARATNĀVALĪ.

Burnell's Catalogue No. 6393b. Page 112. Right column. Substance—Paper. Size—11×4 inches. Sheets—16. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Śrīnivāsa. Incomplete. Not printed.

UPADEŚA I

Beginning:

श्री

श्री आदिनाथं मत्वाथ श्रीनिवासो महामतिः ।
हठरत्नावलीं धत्ते योगिनां कर्णभूषिताम्(?) ॥ १ ॥

वेदे वेदान्तशास्त्रे फणिपतिरचिते शब्दशास्त्रे स्वशास्त्रे
तन्त्रे प्राभाकरीये शशधररचिते न्यायरत्नार्णवेन्दुः ।
सांख्ये सारस्वतीये कणभुगभिहिते तत्त्वचिन्तामणिज्ञो
श्रीमज्ज्योतिर्विदग्रेसरवरतनुजो राजते श्रीनिवासः ॥ २ ॥

हठविद्यां हि मत्स्येन्द्रगोरक्षाद्या विजानते ।
आत्मारामोऽपि जानीते श्रीनिवासस्तथा स्वयम् ॥ ३ ॥

भ्रान्त्या बहुमतध्वान्ते राजमार्गमजानतः ।
केवलं राजयोगाय हठविद्योपदिश्यते ॥ ४ ॥

अथातो योगजिज्ञासाशास्त्रमाद्यमिदं कृतम् ।
योगस्य विषयं वक्तुं योगशास्त्रे प्रयोजनम् ॥ ५ ॥

अपानप्राणयोश्चापि जीवात्मपरमात्मनोः ।
योगश्चायं हि योगार्थं केचिदाचक्षते बुधाः ॥ ६ ॥

End:

श्रुत्वाचार्यप्रसादाच्च योगाभ्यासबलेन च ।
ईश्वरानुग्रहेणैव योगसिद्धिस्तु जायते ॥

श्रीआदिनाथमत्स्येन्द्रशाबरानन्दभैरवाः ।
सारङ्गीमीनगोरक्षविरूपाक्षविलेशयाः ॥

मन्थानभैरवो योगी सिद्धबुद्धिश्च कन्दली ।
कोरंदकः सुरानन्दः सिद्धपादश्च पर्पटी ॥

करोटिः पूज्यपादश्च नित्यनाथो निरञ्जनः ।
कापाली बिन्दुनाथश्च काकचण्डीश्वरो मयः ॥

अल्लमः प्रभुदेवश्च फैटी छोटी च टिण्टिणिः ।
भालुकिर्नागबोधश्च खण्डः कापालिकस्तथा ॥

इत्यादयो महासिद्धाः हठयोगप्रसादतः ।
खण्डयित्वा कालदण्डं ब्रह्माण्डे विचरन्ति ते ।

प्राणायामैरेव सर्वे प्रशुष्यन्ते मला इति ॥

आचार्याणान्तु केषाञ्चिदन्यत्कर्म न सम्मतम् ॥

इदं वचनं हठाभ्यासकरणासामर्थ्यविषयमिति बोध्यम् ॥

सम्प्रदायाब्धिमथनाज्जायते रत्नमालिका ।

सुवर्णखचिता चेत्स्यात् को वा योगी ह्युपेक्षते ॥

Colophon:

इति श्रीमत्सकलतार्किकचूडामणिसकलन्यायशास्त्रसम्प्रदायप्रवर्तक न्यायाचार्यसकलहठयोगै(क)प्रवर्तकर्त्तीरभुक्ते (?) देशीय महादेवमिश्रादिसकलतार्किकवादजयजन्यजयलक्ष्मीविराजमान वैदिकमार्गप्रतिष्ठैकधुर्यशङ्खधरमाणिकण्ठव्याख्यानवेदान्तपरिभाषाद्यनेकग्रन्थकरणजन्यजययशःपुञ्जविद्योतमान तिम्मज्योतिषिकसोमाम्बात्मजश्रीनिवासभट्टमहायोगीन्द्रविरचितायां हठरत्नावल्यां प्रथमोपदेशः ॥

बेधश्चन्द्रमुखीकराम्बुजलसन्माणिक्यवीणारणत्तन्त्रे

कोमलनादभङ्गलहरीमाधुर्यसञ्ज्ञापिनीम् ।

नानार्थाङ्कितचित्रपद्यरचितां वैदग्ध्यविद्योतितां

धत्ते तां हठयोगरत्नसरणिं श्री श्रीनिवासः स्फुटम् ॥

UPADEŚA II

Beginning:

अथ द्वितीयोपदेश आरभ्यते ।

अष्टानां कुम्भकानां तु लक्षणं लक्ष्यतेऽधुना ।

आयुषोऽधिकसिद्ध्यर्थं कुम्भकानभ्यसेत्सुधीः ॥

अथवा ॥

विधिवत्प्राणसंयामैः नाडीचक्रे विशोधिते ।
सुषुम्नावदनं भित्वा सुखाद्विशति मारुतः ॥

मारुते मध्यसञ्चारे मनस्थैर्यं च जायते ।
मनसः सुस्थिरीभावः सैवावस्था मनोन्मनी ॥

तत्सिद्धये विधानज्ञः चित्रान् कुर्वीत कुम्भकान् ।
विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धिमाप्नुयात् ॥

End:

पिङ्गला दम्भिनी सूर्यंयमिनाकाक्षरा तथा ।
कालाग्निरुद्रचण्डी च ते स्युः पिंगळना तथा ॥

इडा चन्द्रा शचीनाली गळगामधुबोधिता ।
इडाया वाचकाः शब्दाः पर्यायेण प्रकीर्तिताः ॥

गोशब्देनोदिता जिह्वा तत्प्रवेशोऽपि तालुनि ।
गोमांसभक्षणं तत्तु महापातकनाशिनी ॥

गोमांसं भक्षयेन्नित्यं पिबेदमरवारुर्णीम् ।
कुलीनं तमहं मन्ये त्वितरे कुलघातकाः ॥

जिह्वाप्रवेशनं भूतवह्निनोद्दापिता खलु ।
चन्द्रात्स्रवति यत्सारः सा स्यादमरवारुणी ॥

Colophon:

इति खेचरीमुद्रा । इति श्री **श्रीनिवासयोगीन्द्रविरचितायां**
हठरत्नावल्यां द्वितीयोपदेशः ॥

"वज्रोळीवरलंबिकादशमहामुद्रान्वितैः कुम्भकैः
युक्तिः केवलकुम्भकेण(न)महता क्षेमंकरेणाधिकम् ।

स्यातेरस्य सुवर्णराजिखचिते रत्नावळीनामके

ग्रन्थेऽस्मिन्नुपदेश एष विविधारम्भो द्वितीयो गतः ॥

UPADEŚA III

Beginning:

अथातोष्टांगयोगानां स्वरूपं किञ्चिदुच्यते ।

बहवो योगिनः सिद्धाः अङ्गैरेतैश्च शोभनैः ॥

मनःप्रसादस्सन्तोषो मौनमिन्द्रियनिग्रहः ।

दमोदाक्षिण्यमास्तिक्यमार्जवं मार्दव क्षमा ॥

भावशुद्धिरहिंसा च ब्रह्मचर्यं स्मृतिर्धृतिः ।

इत्येवमादयोऽन्ये च मनसो नियमाः स्मृताः ॥

End:

युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च पूरयेत् ।

युक्तं युक्तं च बध्नीयादेवं सिद्धिमवाप्नुयात् ॥

यथा तु नाडीशुद्धिः स्यात्तथा चिह्नानि बाह्यतः ।

कायस्य कृशता कान्तिस्तथा जायेत निश्चितम् ॥

यथेष्टं धारणं वायोरनलस्य प्रदीपने ।

नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥

योगयाज्ञवल्क्याचार्यैरुक्तम् ॥

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।

त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥

अत्र शिवदचनम् ।

प्राणायामपरो योगी सोऽपि विष्णुर्महेश्वरः ।

सर्ववेदमयो योगी तस्यावज्ञां न कारयेत् ॥

Colophon:

इति प्राणायामनिरूपणम् ॥

इति श्री श्रीनिवासयोगीन्द्रविरचितायां हठरत्नावल्यां तृतीयो-

पदेशः ॥

" नानास्वस्तिकसिद्धपद्मकमहावीरासनाद्यन्वितः

प्राणायामसमन्वितश्च ललितः श्री श्रीनिवासोदितः ।

ख्याते रम्यसुवर्णराजिखचिते रत्नावलीनामके

ग्रन्थेऽस्मिन्नुपदेश एष विदितारम्भस्तृतीयो गतः ॥

UPADEŚA IV

Beginning:

अत्र समाधिः ॥

सलिले सैन्धवं यद्वत्साम्यं भवति योगवित् ।

तथाऽऽत्ममनसोरैक्यं समाधिः सोऽभिधीयते ॥

मतान्तरेऽपि ।

तत्समत्वं भवेदत्र जीवात्मपरमात्मनोः ।

समस्त नष्टसंकल्पः समाधिः सोऽभिधीयते ॥

ध्यानादस्पन्दमनसः समाधिः सोभिधीयते ।

अतिविस्तरभीत्या तु न सर्वमिह लिख्यते ॥

इन्द्रियाणां मनो नाथो मनोनाथश्च मारुतः ।

मारुतस्य लयो नादः तन्नादं लयमाश्रयेत् ॥

अथ नादानुसन्धानम् ॥

End:

अव्याकृतं च प्रकृतिस्तम इत्यभिधीयते ।
इति सांख्याश्च भाषन्ते तेषां दूषणमुच्यते ॥

चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते ।
ज्ञानक्रिया क्रियाशक्त्या दृश्यते चेतनाश्रये ॥

तस्मादात्मन आकाशस्संभूत इतिविश्रुतः ।

शैवा पाशुपता महाव्रतधरा कालामुखा.........
.... ।

एते कृत्रिमतन्त्रनित्यानिरताः तत्त्वतो वञ्चिताः
तस्मात्सिद्धपदं स्वभाव........................ ॥

Colophon:

श्रीमत्तार्किकचूडामणिधरणीद्राकर्णव्याख्यानेन वेदान्तपरि-
भाषाद्यनेकप्रबन्धकरणजन्यलक्ष्मीविराज(मान)हठयोगप्रवर्तकाचार्य
तिम्मज्यौतिषिकसोमाम्बात्मजश्रीनिवासभट्टयोगीन्द्रविर-
चितायां हठरत्नावल्यां चतुर्थोपदेशः ॥

Subject: Haṭharatnāvalī.

I—IV Upadeśas.

I — योगस्वरूपादिविचारः
II — अष्टकुम्भकलक्षणम्
III — अष्टाङ्गयोगविचारः
IV — समाधिलक्षणम्

Remarks:—

In the introduction to the work he mentions himself as one of the four great advocates of Yoga along with

Matsyendra, Gorakṣa, and Ātmārāma, as well-versed in all branches of knowledge, as an author of commentaries on Śaśadharīya, Maṇikaṇṭhīya and one Vedānta Paribhāṣā (other than the work of Dharmarājādhvariṇ), and as the son of a great astrologer Timmajyautiṣika and Somāmbā. He styles himself as the conqueror of great logicians like Mahādeva Miśra. It may be inferred that he was an Āndhra Brāhman.

In the first chapter after defining Yoga and Prāṇāyāma the author enuumerates 34 Masters of Haṭha-Yoga who flourished prior to him. In the second he describes the eight varieties of holding the vital air (Kumbhaka); in the third he treats about the eight auxiliaries of Haṭha Yoga (Aṣṭāṅgas); and finally in the last he describes Samādhi which according to him is the realisation of oneness of Jīvātman and Paramātman. At the end of each chapter he appends a verse in which he summarises the contents of the chapter.

॥ सङ्कीर्णयोगग्रन्थाः ॥

ECLECTIC YOGIC TREATISES.

॥ क्रियायोगः ॥

6716. KRIYĀYOGAḤ.

Burnell's Catalogue No. 9909. Page 112. **Right column. Substance**—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. **Leaves—80.** Lines—7 to a Page. Script—Telugu. **No. of Granthas**—800. Author—Veṅkaṭayogin. Complete. Not printed.

Beginning:

शुभमस्तु ॥ श्रीस्वयंप्रकाशेन्द्रगुरवे नमः ।

श्रीनाथं योगिजन-
क्षेमङ्करमखिललोकवन्द्यपदम् ।
ध्यायामि मन्मनोरथ-
सिद्ध्यै चित्तेन भक्तियुक्तेन ॥ १ ॥

यद्वाचकमनुसेवां
यतयः कुर्वन्ति सिद्धये सततम् ।
तद्वासमस्तु हृन्मम
मद्वाणी तस्य किंकरी भवतात् ॥ २ ॥

ध्यायाम्यादौ देवं
जगदाधारंभरूपकं शुभदम् ।
यं वहति च कालाघु(?)
श्रुतिरपि यं ब्रह्मणीं पतिं प्राह ॥ ३ ॥

श्रीरामचन्द्रयतिवर-
शिष्यं वन्दे स्वयंप्रकाशगुरुम् ।

जितमदनं नतशरणं
नुतचरणं मरणभीतकृतकरुणम् ॥ ४ ॥

आदिवेंकटयोगीति शिष्यस्तस्य महात्मनः ।
ब्रह्मविन्निधिनामानं ग्रन्थं कृत्वा च बुद्धिमान् ॥ ५ ॥

श्रावयामास गुरवे स्वप्रकाशेन्द्रयोगिने ।
श्रुत्वा तं गुरुवर्योऽपि सन्तुष्टेनान्तरात्मना ॥ ६ ॥

अहो सम्यक्कृतो ग्रन्थः त्वया बुद्धिमतां वर ।
उत्सन्नो योगमार्गोऽयं भवता स्थापितः पुनः ॥ ७ ॥

हरिभक्त्या गुरोर्भक्त्या समाधावनुभूतितः ।
कृत एवंविधो ग्रन्थो नान्यसाध्यो महामते ॥ ८ ॥

End:

हरिभक्तिर्दृढा भूयादणिमादिगुणैर्युतः ।
जीवन्मुक्तश्च सिद्धश्च भवेदत्र न संशयः ॥

बहुशास्त्राणि बहुधा ज्ञात्वा गुरुमुखादपि ।
अनुभूयैव रचितो क्रियायोगो मयाऽधुना ॥

श्रीरामभक्तिर्जयतु भगवान् कुम्भसम्भवः ।
स्वप्रकाशेन्द्रयोगीन्द्रः क्रियायोगश्च मामकः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीस्वयंप्रकाशेन्द्रभगवत्पूज्यपादशिष्य सुब्बयामात्यपुत्रगन्नेपूड्यादि वेङ्कटयोगिविरचिते क्रियायोगे श्रीरामतारकमन्त्रप्रभावकथनं नाम द्वितीयं प्रकरणम् ॥

श्री स्वयंप्रकाशेन्द्रगुरुवरचरणारविन्दाभ्यां नमः ॥

Subject: Kriyāyogah.

I Prakaraṇa — देहस्थिरीकरणक्रमकथनम् ।

II „ — रामतारकमन्त्रप्रभावकथनम् ।

Remarks:—The Ms. is in a fairly good condition.

This work contains two chapters treating about Yogic practices in the first and speaking about the greatness of Rāmatāraka mantra in the second.

The author of this work is Veṅkaṭayogin, the pupil of Svayamprakāśendra, who in turn was the desciple of Rāmacandra Yativara. The fuller name of the author seems to be Ādi-Veṅkaṭa Yogin.

॥ गोरक्षशतकम् ॥

6717. GORAKṢAŚATAKAM.

Burnell's Catalogue No. 6389. Page 112. Right column. Substance—Paper. Size—12 × 5 inches. Sheets—6 (146-151). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—90. Author—Gorakṣanātha. Incomplete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

अधुनासिद्धराजेन गोरक्षेण प्रकाशितम् ।
योगनाथसमभ्यस्तं दिवसैस्सिद्धिसूचकम् ॥ १ ॥

गुरुवक्त्रप्रसादेन स्वानुभूतं मया हि तत् ।
वक्ष्यते साधुसंसिद्धैः नियुक्तानां चिदात्मनाम् ॥ २ ॥

दुर्धीर्भवाब्धि तरति विद्यायां यो निमज्जति ।
पोतेन शिक्षितः पारं अब्धेर्नो यात्यशिक्षितः ॥ ३ ॥
स्वकर्मणैव पुरुषो याति स्वर्गं च दुर्गतिम् ।
ऊर्ध्वं प्राकारकारस्तु यात्यधः कूपकारकः ॥ ४ ॥
तस्मात्प्रयत्न एवादौ कर्तव्यो भवमुक्तये ।
गुरुं बहुगुणं भक्त्या कायवाङ्मानसैर्भजेत् ॥ ५ ॥
दृष्टिर्यन्नोमरुधस्य रूपालम्बनरोधनम् ।
विना यत्नं स्थिराणि स्युराश्रये तं गुरुं सदा ॥ ६ ॥
चित्तं प्रसुप्तं योगेन जाग्रत्स्थार्तिर्नचान्यथा ।
नास्तमेति न चोदेति यस्यासौ मुक्त एव हि ॥ ७ ॥
प्रवेशे निर्गमे वामे दक्षिणे चोर्ध्वमप्यधः ।
न यस्य वायुर्वहति निर्मुक्तो नात्र संशयः ॥ ८ ॥
हेतुद्वयं तु चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिन् धृतं द्वावपि नश्यतः ॥ ९ ॥
तस्मादादौ समीरस्य विजयं कुरु सन्ततः ।
यस्त्वेवं पुरुषो मुक्तो भवेन्मुक्तो जरादिभिः ॥ १० ॥
मरुज्जयस्य तस्योक्तं साधनत्रयमुत्तमम् ।
मिताहारश्चासनञ्च शक्तिचालस्तृतीयकः ॥ ११ ॥
तेषां च लक्षणं वक्ष्ये वक्ष्यमाणक्रमेण तत् ।
सुस्निग्धमधुराहारं चतुर्थांशविवर्जितम् ॥ १२ ॥

भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते ।
आसनं द्विविधं प्रोक्तं पद्मं वज्रासनं तथा ॥ १३ ॥

जान्वोरुपरि चेद्धत्ते उपपादतले तथा ।
पद्मासनं भवेत्सम्यक् सर्वपापप्रणाशनम् ॥ १४ ॥

वामांघ्रि नाभिकन्दोर्ध्वमन्यं तदुपरिक्षिपेत् ।
समग्रीवशिरःकायं वज्रासनमितीरितम् ॥ १५ ॥

शक्तिचालमिदानीं तु प्रवक्ष्यामि समासतः ।
कुण्डल्येव भवेच्छक्तिस्तस्याः सञ्चालनक्रमम् ॥ १६ ॥
स्वस्थानादाभ्रुवोर्मध्यं शक्तिचालनमिष्यते ।
तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनम् ॥ १७ ॥

प्राणरोधस्य तस्यां तु ऋज्वी कुण्डलिनी भवेत् ।
इडेरा(शा)दौ सरस्वत्याश्चालनं कथयाम्यतः ॥ १८ ॥

अरुन्धत्येव कथिता पुराविद्भिः सरस्वती ।
अस्याः सञ्चालनेनैव स्वयञ्चलति कुण्डली ॥ १९ ॥

End:

........................वायुस्तदनुधावति ।
शुष्केमतीतुवा(?)यतस्याद्गतेरस्खलिता ततः ॥ ८४ ॥
अधोगतिं विधायाशु मूलच्छन्दनिरोधतः ।
अपानादूर्ध्वगो भूत्वा वह्निना सह गच्छति ॥ ८५ ॥
प्राणस्थानं ततो वह्नेः प्राणापानौ च सत्वरः ।
मिलित्वा कुण्डलीं याति प्रसुप्ता कुण्डलीकृता ॥ ८६ ॥

तेनाग्निना च सा तप्ता पवनेनैव चालिता ॥

Subject: Gorakṣaśataka.

Remarks.—The Ms. in very much decaying condition.

This work deals with the practical methods of controlling the vital air of the body. It enumerates 3 means for such control and explains each. They are— मिताहार, आसन and शक्तिचालन. The first is moderate diet, the second posture in sitting, and third the moving of the power of Kuṇḍalinī.

Nothing is known of Gorakṣanātha the author of this work. The following Yogamārtāṇḍa also is written by him. From a verse at the end of one of the Mss. of his Siddhasiddhāntapaddhati, we learn that he was also called Śaṅkaranātha.

॥ योगमार्ताण्डः ॥

6718. YOGAMĀRTĀṆḌAḤ.

Burnell's Catalogue No. 9911. Page 112. Right column. Substance—Palm leaf. Size—8⅜ × 1¼ inches. Leaves—17. Lines—6 to a Page. Script—Telugu. No. of Granthas—200. Author—Gorakṣanātha. Complete. Not printed.

Beginning:

द्विजसेवितशाख(श्रृङ्ग)स्य श्रुतिकल्पतरोः फलम् ।
शमनं भवतापस्य योगं सेवत सत्तमाः ॥

आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगांगानि भवन्ति षट् ॥

आसनानि च तावन्ति यावन्तो जीवजन्तवः ।
एतेषां लक्षणं भेदं विजानाति महेश्वरम्(ः) ॥

चतुरशीतिलक्षाणां एकमेकमुदाहृतम् ।
ततः शिवेन पीठानां षोडशानां शतं कृतम् ॥

आसनेभ्यः समस्तेभ्यो द्वयमेव विशिष्यते ।
एकं स्वस्थासनं प्रोक्तं द्वितीयं कमलासनम् ॥

योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं संन्यसेद्
मेढ्रे पादमथैकमेव हृदये कृत्वा समं विग्रहम् ।
स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद्भ्रुवोरन्तर-
म्चैतन्मोक्षकवाटभेदजनकं सिद्धासनं प्रोच्यते ॥

वामोरूपरि दक्षिणञ्च चरणं विन्यस्य वामं तथा
याम्योरूपरि पश्चिमेन घटिता धृत्वा कराभ्यां दृढम् ।
अंगुष्ठे हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविकारहारि यतिनां पद्मासनं प्रोच्यते ॥

End:

व्योम विज्ञानमानन्दं ब्रह्म ब्रह्मविदो विदुः ।
दुग्धे क्षीरं घृते सर्पिः वह्नौ वह्निरिवार्पितम् ॥

अव्ययत्वं व्रजेदेवं योगी लीनः परात्परे ।

भवदवनवनदाहिं मुक्तिसोपानमार्ग
प्रकटितपरमार्थं ग्रन्थगुह्यं च गुह्यम् ।
सकृदपि पठती[च]दं यः शृणोति प्रबन्धं

स भवति भुवि भव्यो भाजनं भुक्तिमुक्त्योः ॥

Colophon:

इति श्री गोरक्षनाथविरचिते योगशास्त्रे योगमार्ताण्डं(ः) समाप्तम्(ः) ॥

Subject: Yogamārtāṇḍa.

Remarks—The Ms. is in good condition.

॥ सिद्धसिद्धान्तपद्धतिः ॥

6719. SIDDHASIDDHĀNTAPADDHATIḤ.

Burnell's Catalogue No. 9895 c. Page 96. Left column. Substance—Palm leaf. Size—9 × 1½ inches. Leaves—73 (1-73). Lines—5 to a Page. Script—Grantha. No. of Granthas—550. Author—Gorakṣanātha. Complete. Not printed.

Beginning:

आदिनाथं नमस्कृत्य शक्तियुक्तं जगद्गुरुम् ।
वक्ष्ये गोरक्षनाथोऽहं सिद्धसिद्धान्तपद्धतिम् ॥

नास्ति सत्यं विचारेऽस्मिन्नुत्पत्तेर्ब्रह्माण्डपिण्डयोः ।
तथापि लोकवृत्त्यर्थं वक्ष्ये सत्सम्प्रदायतः ॥

सा पिण्डोत्पत्त्यादिः सिद्धमते सम्यक्प्रसिद्धः— पिण्डोत्पत्तिः । पिण्डविचारः । पिण्डसंवित्तिः । पिण्डाधारः । पिण्डपदसमरसभावः । नित्यपिण्डावधूतः ।

'यथा नास्ति स्वयंकर्ता कारणं न कुलाकुलम् ।
अव्यक्तं न परं ब्रह्म अनामा विद्यते तथा ॥'

अनामेति स्वयमनादिसिद्धम् । एकमेव । अनादिनिधनं सिद्धसिद्धान्तप्रसिद्धम् । तस्येच्छामात्रधर्मिणी निजशक्तिः प्रसिद्धा । तस्या उन्मुखमात्रेण पराशक्तिरुत्थिता । तस्याः स्पन्दनमात्रेणापराशक्तिरुत्थिता । ततोऽहन्तामात्रेण सूक्ष्मशक्तिरुत्पन्ना । वेदनशीला कुण्डलिनीशक्तिरुत्थिता ।

नित्यता, निरञ्जनता, निष्पन्दता, निराभासता(?) इति पञ्चगुणा निजशक्तिः । अस्तिता, अप्रमेयता, अभिन्नता, अनन्तरता, अव्यक्तता, इति पञ्चगुणा परा शक्तिः ।

स्फुरता, स्फुटता, स्फारता, स्फोटता, स्फूर्तिता इति पञ्चगुणा अपरा शक्तिः ।

निरंशता, निरन्तरता, निश्चलता, निश्चयता, निर्विकल्पता, इति पञ्चगुणा सूक्ष्मा शक्तिः ।

पूर्वता, प्रतिबिम्बता, प्रबलता, प्रोचलता, प्रत्यङ्मुखता, इति पञ्चगुणा कुण्डलिनीशक्तिः । एवं शक्तितत्त्वे पञ्चपञ्चगुणयोगात्परापिण्डोत्पत्तिः । उक्तञ्च ।

'निजा परापरा सूक्ष्मा कुण्डली तासु पञ्चधा ।
शक्तिचक्रक्रमेणोत्था जातपिण्डः परः शिवः' ॥

End:

एतच्छास्त्रं महादिव्यं रहस्यं पारमेश्वरम् ।
सिद्धान्तसारसर्वस्वं नानासङ्केतनिर्णयम् ॥ ९७ ॥

सिद्धानां प्रकटं सिद्धं सद्यः प्रत्ययकारणम् ।
आत्मानन्दकरं नित्यं सर्वसन्देहनाशनम् ॥ ९८ ॥

न देयं परशिष्येभ्यो नान्येषां सन्निधौ पठेत् ।
न स्नेहान्न बलाल्लोभान्न मोहान्न फलाच्चलात् ॥ ९९ ॥
न मैत्रभावनाच्चैव न सौन्दर्यान्न सेवनात् ।
पुत्रस्यापि न दातव्यं गुरुशिष्यक्रमं विना ॥ १०० ॥
सत्यवन्तो दयासक्ता दृढभक्ताः सदाचलाः ।
निस्तरङ्गा महाशक्ता नित्यं ज्ञानप्रबोधकाः ॥ १०१ ॥
भयदैन्यघृणालज्जातृष्णाशोकविवर्जिताः ।
आलस्यमदमात्सर्यदम्भमायाछलोज्झिताः ॥ १०२ ॥
अहङ्कारमहामोहरागद्वेषपराङ्मुखाः ।
क्रोधेर्ष्याकाङ्क्षासूयाभ्रान्तिलोभविवर्जिताः ॥ १०३ ॥
निःस्पृहा निर्मला धीराः सदाऽद्वैतपदे रताः ।
तेभ्यो देयं प्रयत्नेन धूर्तानां गोपयेत्सदा ॥ १०४ ॥
निन्दका ये दुराचाराश्चुम्बका गुरुतल्पगाः ।
नास्तिकाश्च शठाः क्रूरा विद्यावादरताः सदा ॥ १०५ ॥
योगाचारपरिभ्रष्टा निद्राकलहयोः प्रियाः ।
स्वस्वकार्ये परा निष्ठा गुरुकार्येष्वनिस्पृहाः ॥ १०६ ॥
एतान् हि वर्जयेद्दूरे शिष्यत्वेनागतानपि ।
सच्छास्त्रं सिद्धिमार्गञ्च सिद्धसिद्धान्तपद्धति ॥ १०७ ॥
न देयं सर्वदा तेषां यदीच्छेच्चिरजीवनम् ।
गोपनीयं प्रयत्नेन तस्करेभ्यो धनं यथा ॥ १०८ ॥

तेषां वदति यो मोहादपरीक्षितमन्दधीः ।
न हि मुक्तिर्भवेत्तस्य सदा दुःखेन सीदतः ॥ १०९ ॥

खेचरी भूचरी योगी शाकिनी च निशाचरी ।
एतेषामद्भुतं शापं सिद्धानां भैरवस्य च ॥ ११० ॥

मस्तके तस्य पतति तस्माद्यत्नेन रक्षयेत् ।
गुरुपादाम्बुजच्छायामाश्रित्य प्रवदेत्सदा ॥ १११ ॥

कुतो दुःखञ्च भीतिश्च तत्त्वज्ञस्य महात्मनः ।
कृपयैव प्रदातव्यं सम्प्रदायप्रवृत्तये ॥ ११२ ॥

सम्प्रदायप्रवृत्तिर्हि सर्वेषां सम्मतिर्यतः ।
मया शङ्करनाथेन सिद्धसिद्धान्तपद्धतिः ॥ ११३ ॥

लिखिता यः पठेद्भक्त्या स याति परमां गतिम् ।
विदधात्यर्थनिलयं भक्तानुग्रहमूर्तिमत् ॥ ११४ ॥

सदानन्दभरश्चैतो गाणपत्यमिधीमहः(?) ।

Colophon:

इति गोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ अवधूतयोगिलक्षणं नाम षष्ठोपदेशः ॥ हरिः ॐ ॥ शुभमस्तु ॥

Subject: Siddhasiddhāntapaddhati 1-6 Upadeśas.

1 पिण्डोत्पत्तिः	4 पिण्डाधारः
2 पिण्डविचारः	5 समरसकरणम्
3 पिण्डसंवित्तिः	6 अवधूतलक्षणम्

Remarks:—The Ms. is in a fairly good condition. After the colo-

phon are given four lines praising the greatness of God Rāma.

नमः कोदण्डहस्ताय+जहि रावीणम् ॥

The works contained herein are:

1. सपर्या सप्तकव्याख्या
2. रामायणम् (1- sargas)
3. सिद्धसिद्धान्तपद्धतिः 1·6 upadeśas
4. परमन्त्रभक्षिणी महाविद्या महामन्त्रः

Dr. Burnell has noted this work in the Errata to be included in the Vedānta Section, on page 96.

॥ सिद्धसिद्धान्तपद्धतिः ॥

6720. SIDDHASIDDHĀNTAPADDHATIḤ.

Burnell's Catalogue No. 6357. Page 93. Left column.

Substance—Paper. Size—$9\frac{5}{8} \times 5\frac{1}{4}$ inches. Sheets—21. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—451. Author—Gorakṣanātha. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 6719.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell has described this work in the Vedānta section.

॥ तत्त्वप्रदीपिका (सव्याख्या) ॥

6721. TATTVAPRADĪPIKĀ (SVYĀKHYĀ).

Burnell's Catalogue No. 9646-I.

Substance—Palm leaf. Size—$9\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—

41. Lines—8 to a Page. Script—Telugu. No. of Granthas—650. Author—Paramānandayatīndra. Incomplete. Not printed.

Beginning:

जगदङ्कुरकन्दाय सच्चिदानन्दमूर्तये ।
गलिताखिलवेद्याय नमः शान्ताय तेजसे ॥ १ ॥
नमः परमशान्ताय सच्चिदानन्दमूर्तये ।
श्रीदत्तात्रेययोगीन्द्रचन्द्राय परमात्मने ॥ २ ॥

End:

सकलद्वन्द्वदुःखरहितुँडै परमसुखियैयुण्डुननुट शुभमङ्गलम् ॥

Colophon:

इतिश्रीमत्परमहंसपरिव्राजकाचार्यवर्यपरमानन्दयतीन्द्रप्रणीतं बैन
तत्त्वप्रदीपिकयनु योगशास्त्रंबुनन्दु तृतीयाधिकारमु ॥

Subject: Tattvapradīpikāvyākhyā.

I—III. Adhikāras.

1. प्रपञ्चवैचित्र्यविस्तारशोधनम् ।
2. विद्यातत्त्वनिर्णयः ।
४. अद्वतन्त्रविचारः ।

Remarks:—The Ms. is in good condition. The text in this Ms. is followed by a commentary in Telugu language.

This Ms. is not described by Dr. Burnell.

॥ योगतारावली ॥

6722. YOGATĀRĀVALĪ.

P. A. Collection No. 71.

Substance—Paper. Size—8¾ × 4¾ inches. Sheets—2.

Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—35. Author Śaṅkara? Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

वन्दे गुरूणां चरणारविन्दे
सन्दर्शितस्वात्मसुखावबोधे ।
जनस्य ये जाङ्गलिकायमाने
संसारहालाहलमोहशान्त्यै ॥
सदाशिवोक्तानि सपादलक्ष-
लयावधानानि लसन्तु लोके ।
नादानुसन्धानसमाधिमेकं
मन्यामहे मान्यतमं लयानाम् ॥

End:

प्रकाशमाने परमात्मभानौ
नश्यत्यविद्यातिमिरे समस्ते ।
अहो बुधा निर्मलदृष्टयोऽपि
किंचिन्न पश्यन्ति जगत्स्वरूपम् ॥ २६ ॥
सिद्धिं तथाविधमनोविलयं समाधौ
श्रीशैलशृङ्गकुहरेषु कदोपलप्स्ये ।
गात्रं यथा मम लताः परिवेष्टयन्ति
कर्णे तथा विरचयन्ति खगाश्च नीडम् ॥ २७ ॥
विचरतु मतिरेषा निर्विकल्पे समाधौ
कुचकलशयुगे वा कृष्णसारेक्षणानाम् ।
चरतु जडमते वा सज्जनानां मते वा
मतिकृतगुरुदोषा मां विहं न स्पृशन्ति ॥ २८ ॥

Colophon:

इति योगतारावली संपूर्णा । श्रीकामाक्षी देव्यै नमः ॥

Subject: Yogatārāvalī or Nandikeśvaratārāvalī.

Remarks:—The Ms. is in good condition.

The author of this work is not definitely known. There is nothing to indicate Śrī Śaṅkara as its author. The Śri Vānī Vilās memorial edition of the complete works of Śrī Śaṅkara has this work included as one of his minor works. 2 of the Mss. here give the name as Nandikeśa Tārāvali, which name may suggest some Nandikeśa as its author. The Madras Oriental Mss. Library catalogue (Vol. IX. Nos. 4856 and 4857) describes 2 Mss. of this work, where the colophon distinctly ascribes the work to Govindabhagavatpūjyapāda the guru of Śrī Śaṅkara.

॥ योगतारावली ॥

6723. YOGATĀRĀVALĪ.

Burnell's Catalogue No. 6588b. Page 112. Right column. Substance—Paper. Size—$12\frac{3}{4} \times 4\frac{3}{4}$ inches. Sheets—3 (144-146). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—35. Author—Śaṅkara? Complete. Printed.

Beginning, end and subject—Same as No. 6722.

Colophon:

इति नन्दिकेश्वरतारावलिस्समाप्ता । श्रीकामाक्षीदेव्यै नमः ॥

Remarks:—The Ms. is in a very much decaying condition. The other work contained herein is

अमनस्कयोगः

॥ योगतारावली ॥

6724. YOGATĀRĀVALĪ.

Burnell's Catalogue No. 11440c. Page 185. Right column.

Substance—Palm leaf. Size—$8\frac{3}{10} \times 1\frac{3}{10}$ inches. Leaves—1-6 (6). Lines—6 to a Page. Script—Telugu. No. of Granthas—50. Author—Śaṅkara? Complete. Printed.

Beginning—Same as No. 6722.

End:

प्रातर्मध्यन्दिने सायमर्धरात्रौ च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥

Colophon:

इति नन्दियोगतारावलिः सम्पूर्णम्(र्णा) ।

Subject: Yogatārāvalī.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are:—

1. Bhagavat Gītā. (1-122)
2. Pañcākṣarīmantra. 4 sheets
3. (Samādhividhi) Haṭhapradīpikā.
4. Dakṣiṇāmūrtimantra.
5. Sūryāṣṭākṣarīmahāmantra.
6. Muktilakṣaṇa. (Śivagītā from Padmapurāṇa)
7. Gurupūjā.
8. Śri Śaṅkara's Mahāvākyavivaraṇa.
9. Gurugītāstotra.

Dr. Burnell notices the Bhagavatgītā alone in this Ms.

॥ योगतारावली ॥

6725. YOGATĀRĀVALĪ.

Burnell's Catalogue No. 12084 I. Page 208. Right column. Substance— Palm leaf. Size—12⅝×1½ inches. Leaves—1-5 (near the end). Lines—5 to a Page. Script—Grantha. No. of Granthas—45. Author—Śaṅkara? Complete. Printed.

Beginning and subject—Same as No. 6722.

End.

विचरतु + न स्पृशन्ति ॥

योनिस्थापितवामपार्ष्णिघटितं कृत्वा दृढं विन्यसेत्
मेढ्रस्योपरि दक्षिणञ्च चरणं कृत्वा समं विग्रहम् ।
स्थाणुः संयमितेन्द्रियोऽचरदृशा पश्यन् भ्रुवोरन्तरं
एतन्मोक्षकवाटभेदजनकं सिद्धासनं चोच्यते ॥

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition.

The following works are contained in this bundle.

		Leaves			Leaves
1	श्रीचक्रन्यासः	67	8	सौभाग्यविंशतिः	2
2	आम्नायन्यासः	72	9	भद्रकालीमन्त्रबीजस्तुतिः	2
3	नृसिंहसन्ध्यावन्दनं	5	10	श्रीचक्रपूजास्तुतिः or कामकल्पतरुस्तवः 54 verses	6
4	भस्मस्नानविधिः	11			
5	नृसिंहमन्त्राः	24	11	मृत्युञ्जयत्र्यंबकमहामन्त्रः	3
6	सौराष्टाक्षरमन्त्रः	4	12	योगतारावलिः	7
7	अजपामन्त्रः	3	13	सौरयन्त्रपूजाविधिः	5

Dr. Burnell has left this Ms. as an unidentified fragment.

॥ योगतारावली ॥

6726. YOGATĀRĀVALĪ.

Burnell's Catalogue No. 8871 (a). Page Right column. Substance—Paper. Size—$6\frac{7}{8} \times 3\frac{3}{4}$ inches. Sheets—2. Lines—10 to a page. Script—Devanāgarī. No. of Granthas—15. Author—Śaṅkara ?. Incomplete. Printed.

Beginning:

(निरङ्)कुशी(शा)नां श्वसनोद्गमानां
निरोधनैः(केवलकुम्भकाख्यैः) ।
(उदे)ति सर्वेन्द्रियवृत्तिशून्यो
मनोलयः कोऽपि महामतीनाम् ॥ १३ ॥
(नष्ट) श्लिक्ष्याणि न चित्तबन्धो
न देशकालौ न च वायुरोधः ।
न धा(रणा)ध्यानपरिश्रमो वा
समेधमाने सति राजयोगे ॥ १४ ॥

End:

प्रकाशमानो + पश्यन्ति जगत्समस्तम् ॥

Colophon: Nil.

Subject: Yogatārāvalī;

Remarks:—The Ms. is broken. The other work contained herein is a Śiva stotra. This work has not been noticed by Dr. Burnell under this No.

॥ षोडशमुद्रालक्षणम् ॥

6727. ṢOḌAŚAMUDRĀLAKṢAṆAM.

Burnell's Catalogue No. 6385. Page 112. Left column. Substance—Paper. Size—10¼ × 4¾ inches. Sheet—1. Lines—17 to a Page. Script—Devanāgarī. No. of Granthas—19. Author—Śukayogin. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

मुण्डनं कौपिनं भस्म योगपट्टं च वोडनम् ।
सेली शृंगी तथा मुद्रा कण्ठमाला च पादुका ॥ १ ॥

कन्थाटोपं च आधारि दण्डपात्राजिनासनम् ।
क्रमेण कथयिष्यामि सिद्धव्या भ्रमते मनः? ॥ २ ॥

षोडशमुद्राः ॥
कामक्रोधविमुक्तानां दुःखावस्थाभिपक्षयोः ।
....................मानाभिमानसंयुता ॥ ३ ॥

छेदितो यः [नित्य]विचारेण तत्क्षौरं योगिनां ध्रुवम् ।
शब्दादिविषयः पञ्च इन्द्रियाणि समन्वितम् ॥ ४ ॥

डमराम्बरकन्थानि कौपीनं तं विराजितं ।
गुणत्रयकृतं भस्म ज्ञानाग्निर्दहनेनयोः ॥ ५ ॥

निर्गुणं च भवेदेहं भस्मस्थानमुदाहृतम् ।
आद्यन्तरहितं सूत्रं अनादिश्चैव मण्डितम् ॥ ६ ॥

अखण्डमण्डलाकारं योगपट्टं हृदि स्थितम् ।

End:

मनोकाय तथा वाचा दण्डे च मन दणिता (?) ।
निर्गुणं चं भवेद्देहं दण्डं तव विनिर्दिशेत् ॥ १६ ॥
निर्विकल्पकृतं पात्रं भिक्षा च परमं पदम् ।
सन्तोषपावनं ग्रामं घृतं पीत्वा च पूर्णताम् ॥ १७ ॥
कालकृष्णामृगौ हत्वा तस्य कर्म विराजिते ।
तस्योपविष्टते नित्यं स योगी नात्र संशयः ॥ १८ ॥
यादृशी षोडशी मुद्रा ज्ञात्वा गुरुप्रसादतः ।
तस्याहमोहलुब्धा च योगी राजयस्य कथ्यते ॥ १९ ॥

Colophon:

इति श्रीशुकयोगिविरचिते षोडशमुद्रालक्षणम् ॥

Subject: Ṣoḍaśamudrālakṣaṇa.

Remarks:—The Ms. is in good condition. This work gives the insignia or Mudras of a Yogī numbering sixteen which are given in the first verse,

१	मुण्डनम्	९	कण्ठमाला
२	कौपीनम्	१०	पादुका
३	भस्मस्नानम्	११	कंथा
४	योगपट्टम्	१२	आटोपम्
५	बोटनम्	१३	आधारी
६	सेली	१४	दंडम्
७	शृङ्गी	१५	पात्रम्
८	मुद्रा	१६	अग्निासनम्

Each is described as a symbol of a particular internal activity i. e, Muṇḍana is explained as the removal of काम etc, by नित्यविचार and so on,

---

॥ योगप्रकरणम् (सर्वज्ञानोत्तरवृत्तिः) ॥

6728. YOGAPRAKARAṆAM—

(SARVAJÑĀNOTTARAVṚTTIḤ).

Burnell's Catalogue No. 6898 a. Page 111. Left column. Substance—Paper. Size—11¼ × 4½ inches. Sheets—3. (221-223) Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—108. Author—Aghoraśivācārya. Complete. Not printed.

Beginning:

अतःपरं प्रवक्ष्यामि योगं । योगस्याप्यारब्धकार्याक्षिप्तमलादिक्षपणोपायत्वात्पदार्थसंबन्धः । प्रतिपदार्थतया पाटलिकस्संबन्ध....द्विहेतुत्वात् शुचिशब्देन सूचितः। प्रकरणसंबन्धो योगकाण्डतया सूत्रसंबन्धः समुच्चयपदेनेव वाक्यात्मकोऽपि योगियोगात्मकान् गुणानि...भिर्दार्क्यैः । अतश्चर्याकाण्डादनन्तरं योगं संक्षेपतः प्रकर्षाद्वक्ष्यामि । कस्यायं योगसंस्कार — अत आह—

'एकाकिनस्तु शान्तस्य यतचि(च)विरागिणः ।'

निस्पृहस्य ।

'उक्ताहारविहारस्य उक्तचेष्टस्य कर्मसु ।
उक्तस्वभावबोधस्य तत्त्वतः शृणु षण्मुख ॥'

पुरुषस्यैवायं संस्कारको न....जलानामिव चित्तस्येत्यर्थः । शिवयोगस्य सर्वज्ञत्वादिप्रकाशकत्वात् । कीदृशस्य एकाकिनः सर्वसंगपरित्यागादपरिग्रहस्य । सन्यासाश्र-(मिण): शान्तस्य हिंसादिरहितस्य यमनियमयुक्तस्येत्यर्थः । चित्तसंयमो हि यमः । नियमश्चेन्द्रियसंयमः । यदाह पतञ्जलिः 'अहिंसा सत्यमस्तेयं ब्रह्मचर्या....परिग्रहा-यमाः(?) ।'

End:

सर्वेष्वेव(हि) शास्त्रेषु ज्ञेयं वस्तुचतुष्टयम् ।
पशुः पाशः पतिश्चैव शिवश्चेति यथाक्रमम् ॥

पतिरविकारावस्थः शिव एव । अतश्च पतिपदार्थः स एव सोपाधिकनिरुपाधिकाभ्यां भेदद्वयमुपचारत्वादुच्यत इति वक्ष्यामः । ततश्च ज्ञानस्यापि दीक्षाद्यंगत्वान्मोक्षहेतुत्वं परंपरया सिद्धमित्याह—

'ज्ञात्वा तु तत्वसद्भावं तत्र सारं तु दुर्लभम् ।
सर्वथा वर्तमानोऽपि गृह्णाति न पुनस्तनुम् ॥'

Colophon:

इति लक्षद्वयाध्यापक श्रीमदघोरशिवाचार्य विरचितायां श्रीमत्सर्वज्ञानोत्तरवृत्तौ योगप्रकरणम् ॥

Subject: Sarvajñānottaravṛtti; The other work contained herein is Haṭharatnāvalī.

Remarks:—The Ms. is in decaying condition.

Dr. Burnell has described this work in the Śaiva Section.

This Ms. represents the chapter on Yoga in the Sarvajñānottaravṛtti of Aghoraśivācārya, who was a zealous propagator of Śaivaism, probably, in the 12th century A. D., in South India. The work, as a whole must be classified under Śaiva Āgama, but this particular bit. by virtue of its subject-matter is described here.

॥ अध्यात्मयोगः ॥

6729. ADHYĀTMAYOGAḤ.

Burnell's Catalogue No. 6352. Page 112. Right column. Substance—Paper. Size—11×4 inches. Sheets—11. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—82. Author—?. Complete. Not printed.

Beginning:

श्रीरामः कर्ता ॥

सर्वारम्भे गणाध्यक्षो जगज्ज्योतिश्च शारदा ।
सद्गुरूरामचन्द्राय मूलपुरुषाय ते नमः ॥ १ ॥
रामचन्द्रस्य यो भक्त्या विभक्तिर्नैव दृश्यते ।
नित्यानित्यविवेकेन सारासारविचारणा ॥ २ ॥
सच्छास्त्रसन्मार्गेण सत्संगं प्रत्ययो सह ।
पञ्चीकर्णविवर्णेन(?)पिण्डब्रह्माण्डशोधनम् ॥ ३ ॥
अष्टदेहविनिर्मुक्तो स मुक्तो नात्र संशयः ।
अजपाजपनेमेन सोऽहंध्याननिरन्तरम् ॥ ४ ॥

End:

निश्चयान्तरो निर्विकारो त्रिकारं नैव दृश्यते ।
